तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्माऽऽत्मा सन्देहो बहुलो बस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्य पचन आस्यमाहवनीयः। (५। १८। २)

सान्वय पदार्थ।

तस्य (उस) ह वै (परम प्रसिद्ध) एतस्य (इस) आत्मनः (व्यापक) वैश्वानरस्य (वैश्वानरका) सुतेजाः (तेजःशाली द्युलोक ही) मूर्धा (मस्तक) एव (स्वरूप है) विश्वरूपः

(सूर्य) चक्षुः (नेत्र-स्वरूप है) पृथग्वर्त्मात्मा (नाना पथगामी वायु) प्राणः (प्राण स्वरूप है) बहुलः (आकाश) सन्देहः (देहका मध्य भाग है) रयिः (धन या जल) एव (ही) वस्तिः (मूत्र-संग्रहस्थान स्वरूप है) पृथिवी (पृथिवी) एव (ही) पादौ (चरण है) वेदिः (यज्ञ वेदि) एव (ही) उरः (वक्षःस्थल स्वरूप है) बर्हिः (यज्ञ-कुश ही) लोमानि (रोमरूप हैं) गार्हपत्यः (गार्हपत्याग्नि ही) हृदयम् (हृदय-स्वरूप है) अन्वाहार्यपचनः (दक्षिणाग्नि) मनः (मनः स्वरूप है) आहवनीयः (आहवनीय) आस्यम् (मुख स्वरूप है)।

सरलार्थ।

उस परम प्रसिद्ध व्यापक वैश्वानरका तेजशाली द्युलोक (ही) मस्तक है; सूर्य्य ही नेत्र है; नानापथगामी वायु प्राण है; आकाश देहका मध्य भाग है; जल मूत्र-संग्रह स्थान है; पृथिवी चरण है; यज्ञवेदि वक्षस्थल है; यज्ञ-कुश रोम है; गार्हपत्याग्नि हृदय है; दक्षिणाग्नि मन है; और आहवनीय मुख है।

भावार्थ।

वैश्वानर-विराट् ब्रह्मकी तीन लोकोंमें सत्ता पर्याप्त है। उनमें द्यौ मस्तक है और पृथिवी पाद है, और बीचमें सूर्यादिक चक्षुरादि अंग है,

अब पञ्चाग्निहोत्र विद्याकी विधि और महिमा लिखी जाती है।

५ मन्त्र।

तद्यद् भक्तं प्रथममागच्छेत्तद्धोमीयं, स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणायस्वाहेति, प्राणस्तृप्यति। (५।१९।१)

सान्वय पदार्थ।

तत् (इस कारण) प्रथमम् (पहले) यत् (जो) भक्तम् (अन्न) आगच्छेत् (उपस्थित हो) तत् (उसे) होमीयम् (होमके योग्य समझना चाहिये) सः (वह, भोक्ता, खानेवाला) याम् (जिस) प्रथमाम् (पहली) आहुतिम् (आहुतिका) जुहुयात (होम करे) ताम् (उसे) प्राणाय स्वाहा इति (प्राणाय स्वाहा कह कर) जुहुयात (होम करे) (इससे) प्राणः (पांच वृत्ति वाला वायु) तृप्यति (तृप्त होता है)

सरलार्थ।

इस कारण पहले जो अन्न सामने आवे उसे होमके योग्य समझना चाहिये। भोक्ता जिस पहली आहुतिका भोग करे, उसका 'प्राणाय स्वाहा' यह मन्त्र कहकर होम करे। इससे पांच वृत्तिवाला वायु तृप्त होता है।

६ मन्त्र।

प्राणे तृप्यति चक्षुस्तृप्यति, चक्षुषि तृप्यति आदित्यस्तृप्यत्यादित्ये तृप्यति द्यौस्तृप्यति दिवि तृप्यन्त्यां यत्किञ्च द्यौश्चादित्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति। (५।१९।२)

सान्वय पदार्थ ।

प्राणे (प्राणके) तृप्यति (तृप्त होनेपर) चक्षुः (नेत्र) तृप्यति (तृप्त होता है) चक्षुपि (नेत्रके) तृप्यति (तृप्त होने पर) आदित्यः (आदित्य) तृप्यति (तृप्त होता है) आदित्ये (आदित्यके) तृप्यति (तृप्त होने पर) द्यौः (द्युलोक) तृप्यति (तृप्त होता है) दिवि (द्युलोकके) तृप्यन्त्याम् (तृप्त होने पर) यत्किञ्च (जिस किसी पदार्थको) द्यौः (द्युलोक) च (और) आदित्यः (आदित्य) च (और) अधितिष्ठतः (अधिकारमें रखते हैं) तत् (वह) सर्वम् (सब) तृप्यति (तृप्त होता है) तस्य (इस पदार्थकी) तृप्तिम् (तृप्तिके) अनु (बाद) (भोक्ता भी) प्रजया (सन्ततिसे) पशुभिः (पशुओंसे) अन्नाद्येन (दैहिक) तेजसा (कान्तिसे) च (और) ब्रह्मवर्चसेन (ब्रह्मतेजसे) तृप्यति (तृप्त होता है) इति (यह फल है)

सरलार्थ ।

प्राणके तृप्त होनेपर नेत्र तृप्त होता है ; नेत्रके तृप्त होनेपर आदित्य तृप्त होता है ; आदित्यके तृप्त होने पर द्युलोक तृप्त होता है ; द्युलोकके तृप्त होने पर जिस किसी पदार्थको द्युलोक और आदित्य अपने अधिकारमें रखते हैं, वह तृप्त होता है ; इस पदार्थकी तृप्तिके बाद भोक्ता भी सन्तति, पशु, शारीरिक तेज तथा विद्याजनित मानसिक तेजसे तृप्त होता है ।

७ मन्त्र ।

अथ यां द्वितीयां जुहुयात् तां जुहुयाद्व्यानाय स्वाहेति, व्यानस्तृप्यति । (५ । २० । १)

सान्वय पदार्थ।

अथ (अनन्तर) याम् (जिस) द्वितीयाम् (द्वितीय आहुतिको) जुहुयात् (भोक्ता हवन करे) ताम् (उस आहुतिको) व्यानाय स्वाहा इति (व्यानाय स्वाहा यह मन्त्र कहकर) जुहुयात् (हवन करे) (इससे) व्यानः (व्यान) तृप्यति (तृप्त होता है)

सरलार्थ।

अनन्तर भोक्ता जिस द्वितीय आहुतिका हवन करे, उसे 'व्यानाय स्वाहा' यह मन्त्र पढ़कर हवन करे इससे व्यान तृप्त होता है।

८ मन्त्र।

व्याने तृप्यति श्रोत्रं तृप्यति, श्रोत्रे तृप्यति चन्द्रमास्तृप्यति, चन्द्रमसि तृप्यति दिशस्तृप्यन्ति, दिक्षु तृप्यन्तीषु यत्किञ्च दिशश्च चन्द्रमाश्चाधितिष्ठन्ति तत्तृप्यति, तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति। (५।२०।२)

सान्वय पदार्थ।

व्याने (व्यान वायुके) तृप्यति (तृप्त होने पर) श्रोत्रम् (कर्णेन्द्रिय) तृप्यति (तृप्त होती है) श्रोत्रे (श्रोत्रके) तृप्यति (तृप्त होने पर) चन्द्रमाः (चन्द्र) तृप्यति (तृप्त होता है) चन्द्रमसि (चन्द्रके) तृप्यति (तृप्त होने पर) दिशः (दिशाएं) तृप्यन्ति (तृप्त होती हैं) दिक्षु (दिशाओंके) तृप्यन्तीषु (तृप्त होने पर) यत् किञ्च (जिस किसी पदार्थको) दिशः (दिशाएं) च (और) चन्द्रमाः (चन्द्र) अधितिष्ठन्ति (अपने अधिकारमें रखते हैं) तत् (वह

सद) तृप्यति (तृप्त होता है) तस्य (उस पदार्थको) तृप्तिम् (तृप्तिके) अनु (बाद) (भोक्ता) प्रजया (सन्ततिसे) पशुभिः (पशुओंसे) अन्नाद्येन (शारीरिक) तेजसा (तेजसे) च (और) ब्रह्मवर्चसेन (विद्याध्ययनादिजनित मानसिक तेजसे) तृप्यति (तृप्त होता है)

सरलार्थ ।

व्यान वायुके तृप्त होनेपर कर्णेन्द्रिय तृप्त होती है ; कर्णेन्द्रियके तृप्त होनेपर चन्द्रमा तृप्त होता है ; चन्द्रमाके तृप्त होने पर दिशाएं तृप्त होती हैं ; दिशाओंके तृप्त होने पर जिस पदार्थको ये दिशाएं तथा चन्द्रमा अपने अधिकारमें रखते हैं वह तृप्त होता है ; उस पदार्थकी तृप्तिके बाद भोक्ता सन्तति, पशुओं, शारीरिक तेज तथा विद्याध्ययनादिसे उत्पन्न हुए मानसिक तेजसे तृप्त होता है ।

९ मन्त्र ।

अथ यां तृतीयां जुहुयात्तां जुहुयादपानाय स्वाहेत्यपानस्तृप्यति । (५ । २१ । १)

सान्वय पदार्थ ।

अथ (अनन्तर) याम् (जिस) तृतीयाम् (तृतीय आहुति को) जुहुयात् (होम करे) ताम् (उस आहुतिको) अपानाय स्वाहा इति ('अपानाय स्वाहा' यह मन्त्र पढ़ कर) जुहुयात् (होम करे) (इससे) अपानः (अपान वायु) तृप्यति (तृप्त होता है) ।

सरलार्थ ।

अनन्तर जिस तृतीय आहुतिको होम करे उसे 'अपानाय स्वाहा' यह मन्त्र पढ़कर होम करे। इससे अपान वायु तृप्त होता है।

१० मन्त्र ।

अपाने तृप्यति वाक् तृप्यति, वाचि तृप्यन्त्यामग्निस्तृप्यत्यग्नौ तृप्यति पृथिवी तृप्यति पृथिव्यां तृप्यन्त्यां यत्किञ्च पृथिवी चाग्निश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति। (५ । २१ । २)

सान्वय पदार्थ ।

अपाने (अपान वायुके) तृप्यति (तृप्त होने पर) वाक् (वाणी) तृप्यति (तृप्त होती है) वाचि (वाणीके) तृप्यन्त्याम् (तृप्त होनेपर) अग्निः (अग्नि) तृप्यति (तृप्त होता है) अग्नौ (अग्निके) तृप्यति (तृप्त होने पर) पृथिवी (पृथ्वी) तृप्यति (तृप्त होती है) पृथिव्याम् (पृथ्वीके) तृप्यन्त्याम् (तृप्त होनेपर) यत्किञ्च (जिस किसी पदार्थको) पृथिवी च (पृथ्वी और) अग्निश्च (अग्नि) अधितिष्ठतः (अधिकारमें रखते हैं) तत् (वह) तृप्यति (तृप्त होता है) तस्य (उस पदार्थको) तृप्तिम् (तृप्तिके) अनु (पीछे भोक्ता भी) प्रजया (सन्तानसे) पशुभिः (पशुओंसे) अन्नाद्येन (शारीरिक) तेजसा (तेज या बलसे) च (और) ब्रह्मवर्चसेन (विद्याध्ययनादिसे उत्पन्न होनेवाले मानसिक तेजसे) तृप्यति (तृप्त होता है)।

सरलार्थ।

अपान वायुके तृप्त होनेपर वाणी तृप्त होती है; वाणीके तृप्त होने पर अग्नि तृप्त होता है; अग्निके तृप्त होनेपर पृथिवी तृप्त होती है; पृथिवीके तृप्त होनेपर, जिस पदार्थको पृथिवी और अग्नि अपने अधिकारमें रखते हैं वह तृप्त होता है। उस पदार्थके तृप्त होनेपर (स्वयं भोक्ता) सन्तान, पशुओं, शारीरिक कान्ति या बल तथा विद्यादिजनित मानसिक तेजसे तृप्त होता है।

११ मन्त्र।

अथ यां चतुर्थीं जुहुयात्तां जुहुयात् समानाय स्वाहेति समानस्तृप्यति।

समाने तृप्यति मनस्तृप्यति, मनसि तृप्यति पर्जन्यस्तृप्यति, पर्जन्ये तृप्यति विद्युत्तृप्यति, विद्युति तृप्यन्त्यां यत्किञ्च विद्युच्च पर्जन्यश्चाधितिष्ठतः तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति। (५।२२।१-२)

सान्वय पदार्थ।

अथ (अनन्तर) याम् (जिस) चतुर्थीम् (चौथी आहुतिको) जुहुयात् (होम करे) ताम् (उस आहुतिको) समानाय स्वाहा ('समानाय स्वाहा') इति (यह कह कर) जुहुयात् (होम करे) (इससे) समानः (समान वायु) तृप्यति (तृप्त होता है)।

समाने (समान वायुके) तृप्यति (तृप्त होनेपर) मनः

(मन या अन्तःकरण) तृप्यति (तृप्त होता है) मनसि (मनके) तृप्यति (तृप्त होनेपर) पर्जन्यः (पर्जन्य) तृप्यति (तृप्त होता है) पर्जन्ये (पर्जन्यके) तृप्यति (तृप्त होनेपर) विद्युत् (बिजली) तृप्यति (तृप्त होती है) विद्युति (बिजलीके) तृप्यन्त्याम् (तृप्त होनेपर) यत्किञ्च (जिस पदार्थको) विद्युत् (बिजली) च (और) पर्जन्यश्च (पर्जन्य) अधितिष्ठतः (अपने अधिकारमें रखते हैं) तत् (वह) तृप्यति (तृप्त होता है) तस्य (उस पदार्थकी) तृप्तिम् (तृप्तिके) अनु (पीछे स्वयं भोक्ता) प्रजया (सन्तानसे) पशुभिः (पशुओंसे) अन्नाद्येन (शारीरिक) तेजसा (कान्ति या बलसे) ब्रह्मवर्चसेन (विद्याध्ययनादि जनित मानसिक तेजसे) तृप्यति (तृप्त होता है)।

सरलार्थ ।

अनन्तर जिस चौथी आहुतिको होम करे उसे 'समानाय स्वाहा' यह मंत्र पढ़ कर होम करे। इससे समान वायु तृप्त होता है।

समान वायुके तृप्त होनेपर मन तृप्त होता है; मनके तृप्त होनेपर पर्जन्य तृप्त होता है; पर्जन्यके तृप्त होनेपर बिजली तृप्त होती है; बिजलीके तृप्त होनेपर, जिस पदार्थको विद्युत् और पर्जन्य अपने अधिकारमें रखते हैं, वह तृप्त होता है। उस पदार्थके तृप्त होनेके पीछे (स्वयं भोक्ता) सन्तान, पशुओं, शारीरिक कान्ति या बल तथा विद्याध्ययनादि जनित मानसिक तेजसे तृप्त होता है।

१२ मन्त्र ।

अथ यां पञ्चमीं जुहुयात्तां जुहुयादुदानाय स्वाहेति उदान स्तृप्यति । (५ । २३ । १)

उदाने तृप्यति त्वक् तृप्यति, त्वचि तृप्यन्त्यां वायुस्तृप्यति, वायौ तृप्यत्याकाशस्तृप्यत्याकाशे तृप्यति यत्किञ्च वायुश्चाकाशश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिम् तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति । (५ । २३ । २)

सान्वय पदार्थ ।

अथ (अनन्तर) यां (जिस) पञ्चमीम् (पांचवीं आहुतिको) जुहुयात् (होम करे) ताम् (उस आहुतिको) उदानाय स्वाहा इति ('उदानाय स्वाहा' यह मन्त्र कहकर) जुहुयात् (होम करे) (इससे) उदानः (उदान वायु) तृप्यति (तृप्त होता है) ।

उदाने (उदान वायुके) तृप्यति (तृप्त होनेपर) त्वक् (त्वगिन्द्रिय या स्पर्शेन्द्रिय) तृप्यति (तृप्त होता है) त्वचि (त्वगिन्द्रियके) तृप्यन्त्यां (तृप्त होनेपर) वायुः (वायु) तृप्यति (तृप्त होता है) वायौ (वायुके) तृप्यति (तृप्त होनेपर) आकाशः (आकाश) तृप्यति (तृप्त होता है) आकाशे (आकाशके) तृप्यति (तृप्त होनेपर) यत् किञ्च (जो कुछ या जिस पदार्थको) वायुश्च (वायु और) आकाशश्च (आकाश) अधितिष्ठतः (अपने अधिकारमें रखते हैं) तत् (वह पदार्थ) तृप्यति (तृप्त होता है) तस्य (उस पदार्थकी) तृप्तिम् (तृप्तिके) अनु (पीछे स्वयं भोक्ता) प्रजया (सन्तानसे) पशुभिः (पशुओंसे) अन्नाद्येन

(शारीरिक) तेजसा (बल या कान्तिसे) (और) ब्रह्मवर्चसेन (विद्याध्ययनादि जनित मानसिक तेजसे) तृप्यति (तृप्त होता है)।

सरलार्थ।

अनन्तर जिस पांचवीं आहुतिको होम करे उसे 'उदानाय स्वाहा' यह मन्त्र पढ़ कर होम करे। इससे उदान वायु तृप्त होता है।

उदान वायुके तृप्त होनेपर त्वागिन्द्रिय वा स्पर्शेन्द्रिय तृप्त होती है, त्वगिन्द्रियके तृप्त होनेपर वायु तृप्त होता है; वायु तृप्त होनेपर आकाश तृप्त होता है, आकाशके तृप्त होनेपर वायु और आकाश, जिस पदार्थको अपने अधिकारमें रखते हैं, वह तृप्त होता है, इस पदार्थकी तृप्तिके पीछे (स्वयं भोक्ता) प्रजा, पशुओं, शारीरिक तेज या बल तथा विद्यादि जनित मानसिक तेजसे तृप्त होता है।

यह विषय बहुत मनन करने योग्य है। प्राणाग्निहोत्रसे जड़ चेतन सबको तृप्त करलेनेके बाद साधक शान्त गंभीर बन जाता है।

पञ्चम अध्याय समाप्त।

अथ षष्ठअध्याय ।

इसके अनन्तर ब्रह्मज्ञानकी प्राप्ति और उसके फल श्वेतकेतु और उसके पिता आरुणीके संवाद रूपमें दिखाये गये हैं। श्वेतकेतु पूछता है :—

१ मंत्र ।

येनाश्रुतं श्रुतं भवति अमतं मतमविज्ञातं विज्ञातमिति कथन्नु भगवः स आदेशो भवतीति ? (६ । १ । ३)

सान्वय पदार्थ ।

येन (जिस आदेश या उपदेशके सुननेसे) अश्रुतम् (न सुना हुआ) श्रुतम् (सुना हुआ) भवति (हो जाता है) अमतम् (विना विचारा हुआ) मतम् (विचारा हुआ हो जाता है) अविज्ञातम् (विना जाना हुआ) विज्ञातम् (जाना हुआ हो जाता है) इति (इस प्रकार श्वेतकेतुसे उसके पिता आरुणीने प्रश्न किया कि क्या तूने अपने गुरुसे ऐसा उपदेश सुना है, जिसके सुननेसे अश्रुत श्रुत हो जाता है ? इत्यादि यह सुनकर श्वेतकेतु कहता है) भगवन् (हे पूज्य पिता !) सः (वह) आदेशः (उपदेश) कथन्नु (किस प्रकार) भवति (है) इति (इस प्रकार)

सरलार्थ ।

श्वेतकेतुसे उसके पिता आरुणीने प्रश्न किया, क्या तूने अपने आचार्यसे ऐसा उपदेश पाया या सुना है, जिसके

सुननेसे न सुना हुआ सुना हुआ, विना विचारा हुआ विचारा हुआ, विना जाना हुआ जाना हुआ, हो जाता है? (यह सुनकर श्वेतकेतु कहता है, हे पूज्य पिता! वह उपदेश किस प्रकारका है?)

२ मंत्र ।

यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् । (६ । १ । ४ ।)

सान्वय पदार्थ ।

सौम्य (हे भव्यमूर्त्ति श्वेतकेतु!) यथा (जैसे) एकेन (एक) मृत्पिण्डेन (मिट्टीके ज्ञानसे) सर्वम् (सब) मृन्मयम् (मृत्तिकाकी बनी चोजें) विज्ञातम् (विदित) स्यात् (हो जाती हैं, क्योंकि) वाचारम्भणम् (वचनोंका आरम्भ रूप) वाचा (शब्द मात्रसे) नामधेयम् (और नाममात्र) विकारः (विकार वा कार्य है) मृत्तिका (मिट्टी) इत्येव (यही) सत्यम् (सत्य है)।

सरलार्थ ।

पिता बोले, "हे प्रियदर्शन श्वेतकेतु! मिट्टीके एक गोलेके ज्ञानसे जिस प्रकार मिट्टीकी बनी सब चीजें विदित होती हैं; क्योंकि विकार या कार्य शब्दमात्र वा नाम मात्र है; मृत्तिका ही सत्य है।"

भावार्थ ।

जिस प्रकार एक मृत्तिकाको जाननेसे सभी मृत्विकार ज्ञात

होते हैं, उसी तरह एक ब्रह्मको जाननेसे सभी पदार्थ विदित हो जाते हैं। इसी तरह जितने पदार्थ तुम देख रहे हो, वे सब नाम रूपके भेदसे अनन्त ज्ञान होते हैं। यदि सबके नाम-रूप अलग कर दिये जायं, तो केवल ब्रह्म ही ब्रह्म रह जाता है। इसके जाननेपर कोई अन्य वस्तु अज्ञात नहीं रह जाती।

वह क्या है और उसकी सत्ता किस तरह समस्त संसारमें सदासे वर्तमान है, यह सिद्ध किया जाता है।

३ मंत्र।

सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम् तदैक्षत बहुस्यां प्रजायेयेति तत्तेजोऽसृजत। तत्तेज ऐक्षत बहुस्यां प्रजायेयेति। तदपोऽसृजत। ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहीति ता अन्नमसृजन्त। (१।३।४।)

सान्वय पदार्थ।

सौम्य (हे श्वेतकेतु!) तु (परन्तु) अग्रे (आगे सृष्टिके पूर्व) एकम् (एक) एव (ही) अद्वितीयम् (अद्वितीय) इदम् (यह प्रत्यक्षवद् भासमान संसार) सद् (कारण रूप ब्रह्म) एव (ही) आसीत् (था) इति ह उवाच (यह आरुणी बोले) तत् (उस ब्रह्मने) ऐक्षत (ज्ञान-रूप संकल्प किया कि) एकोऽहम् (एक ही रहकर मैं) बहु (बहुत) स्याम् (हो जाऊं) (अर्थात्) प्रजायेय (मैं जगत्‌का सृजन करूं) इति (ऐसा संकल्प होनेसे) (उसे स्फूर्त्ति हुई स्फूर्त्ति होनेसे वायु चला और उससे) तत् (उस ब्रह्मने) तेजः (तेजको) असृजत (उत्पन्न किया) तत् (उस)

तेजः (तेजोरूपने) ऐक्षत (ज्ञानरूप संकल्प किया) बहु (बहुत) स्याम् (बनूं) (अर्थात्) प्रजायेय (जगत्का सृजन करूं) इति (यह संकल्पकर) तत् (उस ब्रह्मने) अपः (जलका) असृजन्त (सृजन किया) ताः (उस) आपः (जलरूपने) ऐक्षन्त (ज्ञानरूप संकल्प किया कि) बह्व्यः (अनेक) स्याम (बनूं) (अर्थात्) प्रजायेमहि (मैं जगत्का सृजन करूं) (ऐसा संकल्प कर) ताः (उस जलरूपने) अन्नम् (पृथिवीको) असृजन्त (बनाया)

सरलार्थ।

आरुणी बोले, 'हे श्वेतकेतु! सृष्टिके पूर्व यह सत्यवत्की भांति भासमान् संसार, एक ही, अद्वितीय कारणरूप ब्रह्म था। उस ब्रह्मने ज्ञानरूप संकल्प किया कि मैं एक ही रहकर बहुत हो जाऊं; अर्थात् मैं जगत्की रचना करूं। इस संकल्पसे उसे स्फूर्ति हुई। उस स्फूर्तिसे वायु चला और उससे उस ब्रह्मने तेजको उत्पन्न किया। उस तेजोरूपने ज्ञान-रूप संकल्प किया कि मैं बहुत बन जाऊं; अर्थात् जगत्की रचना करूं। यह संकल्प कर उस तेजोरूप ब्रह्मने जल बनाया। उस जलरूपने ज्ञानरूप संकल्प किया कि अनेक बन जाऊं; अर्थात् जगत्की सृष्टि करूं। यह संकल्प कर उस जलरूप ब्रह्मने पृथिवीको बनाया।

भावार्थ।

सृष्टिके पहले सत्-रूप ब्रह्म था। उसने इच्छाकी कि मैं एक

रहकर भी अनेक बन जाऊं; इस लिये उसका स्पन्दन वायुरूप हो गया। वह तेजोरूप हो गया। पश्चात् तेजसें जल, जलसे पृथिवी आदि बने और तदनन्तर क्रमशः देवलोक, पितृलोक तथा भूलोकका सृष्टि हुई। इस प्रकार विचारनेसे वह ब्रह्म ही एक मात्र जाननेका चीज है, जिसके ज्ञानसे सब कुछ जाना जाता है।

षष्ठ अध्याय समाप्त

अथ सप्तम अध्याय

—o—

अबतक उत्तम अधिकारीको एक विज्ञानसे सब विज्ञान प्रतिज्ञादि उपायसे आत्मबोधका प्रकार दिखलाया गया। अब मध्यम अधिकारीको भी उसकी बुद्धिके अनुसार कैसा उपदेश करना चाहिये यह सनत्कुमार नारदका दृष्टान्त देकर बतलाते हैं जिसका यह निम्न लिखित मंत्र है :—

१ मन्त्र ।

अधीहि भगव इति होपससाद सनत्कुमारं नारदस्तं होवाच यद्वेत्थ तेन मोपसीद, ततस्त ऊर्ध्वं वक्ष्यामीति स होवाच ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं नामवा ऋग्वेदः। अस्ति भगवो नाम्नोभूयः। वाग्वाव नाम्नो भूयसी। मनो वाव वाचोभूयः। संकल्पो वाव मनसो भूयान्। इत्यादि
(७।१।१—२, ७।१।४-५,।७।२।१, ७।३।१, ७।४।१)

सान्वय अर्थ।

भगवः (भगवन् सनत्कुमार) अधीहि (हमको ज्ञान दीजिये) इति (ऐसी प्रार्थना करते हुए) नारदः (नारदमुनि) सनत्कुमारं (सनत्कुमारकी) उपससाद (शरण आये), ह (ऐतिह्य) स (सनत्कुमारजीने) तं (उन नारदजीसे) उवाच (कहा), यत्

(जो) वेत्थ (जानते हो) तेन (उससे) मां (हमको) उपसीद् (जितना समझा है सो कहो), तेन उर्ध्वं (इसके बाद) ते (तुमसे) वक्ष्यामि (कहेंगे) इति (इस प्रकार सनत्कुमारकी बात सुनकर) सः (नारदजीने) उवाच (कहा) भगवः (भगवन्) अहं (मैंने) ऋग्वेदं (ऋग्वेदको) यजुर्वेदं (यजुर्वेदको) सामवेदं (सामवेदको) चतुर्थं (चौथे) अथर्वणं (अथवर्णको) पञ्चमं (पांचवे) इतिहासपुराणं (इतिहास पुराणको) अध्येमि (पढ़ा है) सनत्कुमारने कहा, "ऋग्वेदः (ऋग्वेदादि जो तुमने पढ़े हैं) नाम (शब्दमात्र है) वा (निश्चय) भगवः (भगवन्) नाम्नः (शब्दसे) भूयः (बढ़कर) अस्ति (है, क्या) वाग् (वागिन्द्रिय) नाम्ना (नामसे) भूयसी (बड़ी है) वाव (निश्चय) उससे कोई बड़ा है " वाचः (वागिन्द्रियसे) मनः (मनः) भूयः (बड़ा है) " उससे कोई" बड़ा है) मनसः (मनसे) चिकीर्षा बुद्धि, (उससे) संकल्पः (कर्तव्याकर्तव्यविभाग) भूयान् (बड़ा है)

भावार्थ ।

देवर्षि नारदने भगवान् सनत्कुमारकी शरणमें जाकर ज्ञानोपदेशकी प्रार्थना की। तुमने क्या क्या पढ़ा है यह पहले हमको बताओ ऐसी भगवान् सनत्कुमारकी आज्ञा पाकर नारदजीने कहा, "मैंने चारो वेद तथा इतिहास पुराणादि १४ विद्याएं सांगोपांग पढ़ी हैं।" इसपर सनत्कुमारजी बोले; "यह केवल शब्दमात्र है।" नारदजीने कहा इससे जो बड़ा हो सो क्रमशः हमसे कहिये, तब सनत्कुमारजीने कहा कि शब्दसे वागिन्द्रिय, उससे चिकीर्षाबुद्धि, उससे

कर्तव्याकर्तव्यविभाग, उससे प्राप्त कालके अनुरूप स्फुरण, उससे एकाग्रता, उससे शास्त्रजन्यज्ञान, उससे भी मानस बल ये अध्यात्मसे क्रमशः बड़े हैं। कारण यह है कि पूर्व पूर्व उत्तरोत्तरके अधीन हैं। इन सबको सुरक्षित चलानेके लिये आधिभौतिकमें अन्न बड़ा, उससे वृष्टि जल, उससे वायुसहित तेज, उससे आकाश ये क्रमशः बड़े और पूर्व पूर्वके कारण हैं। ये बाह्य पांचो भोग्य अन्तस्थ स्मरण-शक्तिसे सम्पन्न पुरुषके लिये सुखप्रद होते हैं, नहीं तो दुःखद होते हैं। इसलिये इनसे अन्तस्थ स्मरण शक्ति बड़ी है। उससे भी आकाङ्क्षा बड़ी है। इन सबको चलानेवाला प्राण है। इसलिये सबसे श्रेष्ठ प्राण है। प्राण चले जानेपर शरीर शव हो जाता है। इस प्राणसे पूर्वसिद्ध जो सत्ता है वही ब्रह्म है, वही आत्मा है, वही सर्व-श्रेष्ठ और बड़ी है जिसमें किसी व्यवहारका अवसर नहीं है। उसीके ज्ञानसे मोक्ष है। इसी निश्चयसे नारदजी कृतकृत्य हुए।

सप्तम अध्याय समाप्त ।

अथ अष्टम अध्याय

आठवें अध्यायके चौथे खण्डमें ब्रह्मलोककी प्राप्तिका उपाय "तंह एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्दति" इत्यादि मन्त्रोंसे ब्रह्मचर्य बतलाया गया है। पांचवें खण्डमें उसका लक्षण तथा महिमा बतायी गयी है। यद्यपि अन्यान्य ग्रन्थकारोंने ब्रह्मचर्यका लक्षण अनेक प्रकारसे किया है, तथापि सबका निचोड़ यही है और उपनिषदोंसे सिद्ध भी होता है कि बाह्य तथा आभ्यन्तरके विषयोंसे अपनी इन्द्रियोंको खींचकर मन और इन्द्रियोंको अपने वशमें रखते हुए श्रुति तथा स्मृतिमें कहे हुए मार्गपर विश्वास रखकर शुद्ध हृदयसे यज्ञ सम्बन्धी कर्म करना ही ब्रह्मचर्य है और यही ब्रह्मलोकप्राप्तिका एकमात्र साधन है। अतएव आगेके ग्रन्थोंसे इन्द्र और विरोचनके दृष्टान्तसे ब्रह्मचर्यका मुख्य साधनत्व सिद्ध किया गया है।

अष्टम अध्याय समाप्त।

अथ नवम अध्याय

उपनिपदोंको शिक्षाका सारांश।

भगवान् अनन्तशक्ति परमात्माकी अतर्क्य महिमासे इस जगत्की सृष्टि, स्थिति, लय हो रहा है। जिसमें परमेश्वरका न कोई इष्टफल प्राप्त करना है और न कोई अनिष्ट दूर करना है, तथापि परमदयालु भगवान् केवल अनादिकालसे अविद्या-ग्रस्त प्राणियोंका उद्धार करनेकी ही चेष्टा करता है, और सब प्राणी अपनी अपनी उन्नति करके पूर्ण सुखको प्राप्त हो जांय यह सोचकर वेदद्वारा कर्मकाण्ड, उपासनाकाण्ड, और ज्ञानकाण्डके विभागसे अनेक उपाय बताता है। उनमें विशेपतः उपनिपदोंमें इस जीवको सांसारिक गति कैसे प्राप्त होती है और इससे उद्धार कैसे होगा यह दिखलानेके लिये सृष्टिसे लेकर प्रलय पर्यन्तकी प्रक्रियाका वर्णन किया है, जिसका ज्ञान होनेसे मनुष्यका अज्ञान और संकुचित भाव नष्ट होकर उदात्त और सर्वत्र समबुद्धिके भाव बन जाते हैं। उसकी विवेचना यथामति करता हूं। सृष्टिके आदिमें प्राणी कर्मादृष्ट वशसे भगवान्में ईक्षणरूप मायावृत्ति होकर भगवान्की माया शक्तिके ही ८ परिणाम क्रमसे प्रकृति, महत् इत्यादि होते हैं। इतनी ही जगत्की मुख्य सामग्री होनेसे यही अष्टविध प्रकृति कही जाती है।

श्रीमद्भगवद्गीतामें अपर प्रकृति यही कही है इसमें आप प्रकृति जो माया शब्दसे वेदान्तमें कही जाती है इसी अनिर्वचनीय माया शक्तिको भगवान् अपने वशमें रखकर सर्वज्ञ शक्तिमान् नित्य ज्ञानवान् नित्य मुक्त ईश्वर कहे जाते हैं । मूल प्रकृतिका द्वितीय विकार महत्तत्त्व है जो रज तमको दबाकर सत्त्वकी उत्कर्षावस्था स्वरूप होनेसे ईश्वर चैतन्यका प्रतिविम्ब ग्रहण योग्य रूप हो जाता है । उसीमें चैतन्यका प्रति फल न होकर तीसरी विशिष्ट अवस्था होती है जिसका नाम अहङ्कार है । यही समष्टि लिङ्ग शरीर कहा जाता है । इसी संघातका अभिमानी जीव हिरण्यगर्भ शब्दसे व्यवहृत होता है । आगे इस अहङ्कारसे क्रमशः शब्दतन्मात्रा, स्पर्शतन्मात्रा, रूपतन्मात्रा रसतन्मात्रा, गन्ध तन्मात्राकी सृष्टि होती है । इन पांचोंका जो स्थूल भाव है वही पञ्चमहाभूत है । इनकी रचना विशेषसे जो शरीराकृति है वही विराट् शरीर है । इसीमें तीनो लोक अन्तर्भूत हैं । इसका अभिमानी ब्रह्मा प्रजापति नामसे कहा जाता है । यह जगत्की उत्पत्त्यवस्थाका अभिमानी है । ॐ शब्दमें अकार इसीका वाचक है । इसकी उत्पत्ति हिरण्यगर्भसे होती है और लय भी उसीमें होता है । हिरण्यगर्भ जगत्की स्थिति अवस्थाका अभिमानी है ॐकारमें उकार शब्द उसीका वाचक है । इसकी उत्पत्ति ईश्वरसे तथा लय भी उसीमें होता है । जगतकी लयावस्थाका अभिमानी ईश्वर है । वह नित्य है । उसका वाचक ॐकारमें मकार है ॥

प्राणिमात्रके जीव ईश्वर चैतन्यसे बनते हैं । जीवहीको प्रमाता भोक्ता कहते हैं अतएव जीवेश्वरका ऐक्य वर्णन किया है । मूल प्रकृति

से जीवमात्रको उपाधि अविद्या बनो है यही सब संसारका मूल है। कारण यही अस्मिता राग द्वेष अभिनवेशको उत्पन्न करती है। यह नष्ट होनेसे जीव मुक्त होता है, सम्यक् ज्ञानसे इसका नाश होता है। महत्तत्व अहङ्कारसे क्रमशः प्राणि मात्रकी बुद्धि और ११ इन्द्रियां उत्पन्न होती हैं। बुद्धि और भोक्ताको भोग्य पदार्थके भोग करनेका यही साधन है। तन्मात्राओंसे नाम और रूपकी सृष्टि होती है नाम और रूप यही भोग्य हैं उसमें शब्द तन्मात्रासे नाम और अन्य चारोंसे रूप बनता है। शब्दसे अन्य मूर्त पदार्थोंको रूप कहते हैं। इसको प्रक्रिया निम्नलिखित प्रकारसे हैं।

अहंकारसे ८ वसु, ११ रुद्र, १२ आदित्य बनते हैं। इन्हींको अधिदैव कहते हैं। इनमेंसे ८ वसु स्थूल भूतकी सहायतासे प्राणि-मात्रके लिये स्थूल देह और भोग्य विषय तथा वसति स्थानको बनाते हैं। ११ रुद्रसे उनको इन्द्रियां बनती हैं, तथा १२ आदित्य से काल बनता है।

भूलोकके प्राणियोंके लिये यही पृथिवी प्रकृति है। इसीमें अष्ट-विध प्रकृति आकर बसी है। भूलोकमें भोग करनेवाले प्राणियोंका लिङ्गदेह पर्जन्यसे पृथिवोमें आकर औषध द्वारा माता पिताकी सहायतासे स्थूल देहको धारण करता है।

पृथिवीके अन्नको खाकर जीवन व्यतीत करता है और पृथिवी ही पर बसता है, पृथिवीहीमें उसके स्थूल शरीरका लय होता है वैसाही अपने जीवन भरके लिये अपना शरीर ही प्रकृति है।

इसको सर्वदा मूल प्रकृतिके समान साम्य स्थितिमें रखनेसे

धर्मार्थ काम सिद्ध हो सकते हैं। शरीरके साम्यसे वाणीका भी व्यवहार समानतामें चला सकते हैं।

तथा पूर्वोक्त ८ प्रकृतियोंमें प्रत्येकका गुण समझकर अपनेमें उस गुणका संग्रह करना चाहिये।

जैसे पृथिवीका गुण सहन शीलता है वैसेही सर्वदा सहन शीलताका अभ्यास करना चाहिये। तथा जलमें जैसा स्नेह गुण है वैसा पूर्ण स्नेह भाव सबके साथ रखनेसे सबके प्रेमसे आकृष्ट रहेगा।

तेजमें जैसी तेजस्विता और ऊर्ध्व जानेका स्वभाव है वैसी अपनेमें तेजस्विता और सत्य व्यवहार हीसे असत्य व्यवहारको दबाकर ऊर्ध्व गति सम्पादन करना चाहिये।

वायुमें सदा गमन होनेपर भी जैसे कहीं वायु आसक्त नहीं होता, वैसे अपने सत्कर्म करके भी अलिप्त रहना और बलशाली रहना चाहिये

आकाश जैसे सबको अवकाश देकर सूक्ष्मसे सूक्ष्म पदार्थोंमें भी प्रविष्ट रहता है उसी तरह निर्भय होकर सब विचारोंको स्थान देकर सूक्ष्म विषय भी समझ लेना चाहिये।

अहंकार जैसा नियमित पदार्थोंको बनाकर उनमें व्याप्त होकर रहता है उसी तरह अपने भी आवश्यकीय कल्याणकारक कर्मोंमें मनको सहकारी बनाके प्रवृत्त होना चाहिये।

महत्तत्वके समान अपनी बुद्धिको सर्व श्रेष्ठ और बड़ी वा उदार बनाना चाहिये। और मूल प्रकृतिके समान सर्वदा साम्य स्थितिमें रहना चाहिये।

जैसे जिस प्राणीको पूर्व कर्मोंके अदृष्टसे ब्राह्मण, क्षत्रिय, वैश्यमें जिस वर्णका अथवा मनुष्य, पशु, पक्षी, वृक्ष अर्थात् जिस योनिका शरीर मिलेगा वही अपनी प्रकृति है।

उसको योग्यताके अनुसार शास्त्रसे अथवा लोक व्यवहारसे जो कर्तव्य प्राप्त होगा उसको प्रयत्न और उत्साहसे अवश्य करना चाहिये।

उसको न करना अथवा राग द्वेषसे विरुद्ध करना यह अपनी प्रकृतिसे विरुद्ध होकर अधः पात करता है। इसलिये शास्त्रकारोंने नित्य कर्म न करनेमें और प्रतिषिद्ध करनेमें पाप कहा है। इसी रीतिसे नित्य कर्मका अनुष्ठान और प्रतिषिद्धका परित्याग करते हुए शास्त्रोक्त काम्यकर्मोंका विधि तथा श्रद्धा पूर्वक अधिकारानुरूप जो अनुष्ठान किया जायगा, उससे इस लोकका भोग उत्तम होकर परलोक भी उत्तम प्राप्त होता है।

तदनन्तर क्रमशः देवलोक, पितृलोक तथा भूलोकको सृष्टि हुई। इस प्रकार विचारनेसे ब्रह्मको छोड़ केवल नाम और रूप ये ही पदार्थ विभिन्न ज्ञात होंगे। पर ये दो पदार्थ मायाके प्रपंच होनेसे असद्रूप हैं; अतः वास्तविक संज्ञा केवल ब्रह्मकी ही है। उसके अतिरिक्त कोई वस्तु नहीं है।

नवम अध्याय समाप्त।

शान्ति मन्त्र।

ॐ आप्यायन्तु ममाङ्गानि वाक् प्राणश्चक्षुः श्रोत्र मथोबल-मिन्द्रियाणिच सर्वाणि सर्वं ब्रह्मौपनिषदं माहं ब्रह्म निराकुर्या मामा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु। ओं शान्तिः शान्तिः शान्तिः ।

छान्दोग्योपनिषत् ।

(मूल ।)

छान्दोग्योपनिषत्

प्रथमोऽध्यायः ।

—:*:—

प्रथमः खण्डः ।

ओमित्येतदक्षरमुद्गीथमुपासीत । ओमिति ह्युद्गायति, तस्योपव्याख्यानम् ॥ १ ॥ एषां भूतानां पृथिवी रसः, पृथिव्या आपो रसः, अपामोषधयो रसः, ओषधीनां पुरुषो रसः, पुरुषस्य वाग्रसः, वाच ऋग् रसः, ऋचः साम रसः साम्न उद्गीथो रसः ॥ २ ॥ स एष रसाना ँ रसतमः परमः परार्ध्योऽष्टमो यदुद्गीथः ॥ ३ ॥ कतमा कतमर्क्, कतमत् कतमत् साम, कतमः कतम उद्गीथ इति विमृष्टं भवति ॥ ४ ॥ वागेवर्क्, प्राणः साम, ओमित्येतदक्षरमुद्गीथः । तद्वा एतन्मिथुनं यद्वाक् च प्राणश्चर्क् च साम च ॥ ५ ॥ तदेतन्मिथुनमोमित्येतस्मिन्नक्षरे स ँ सृज्यते; यदा वै मिथुनौ समागच्छतः, आपयतो वै तावन्योन्यस्य कामम् ॥ ६ ॥ आपयिता ह वै कामानां भवति, य एतदेवं विद्वानक्षरमुद्गीथ मुपास्ते ॥ ७ ॥ तद्वा एतदनुज्ञाक्षरं, यद्धि किञ्चानुजानात्योमित्येव तदाह, एषो एव समृद्धिर्यदनुज्ञा, समर्द्धयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते ॥ ८ ॥ तेनेयं त्रयी विद्या वर्त्तते, ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायत्येतस्यैवाक्षरस्यापचित्यै महिम्ना रसेन ॥ ९ ॥ तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद । नाना तु विद्या चाविद्या

च; यदेव विद्यया करोति श्रद्धयोपनिषदा, तदेव वीर्यवत्तरं भवतीति खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति ॥ १० ॥

इति प्रथमः खण्डः ॥ १ ॥

द्वितीयः खण्डः ।

देवासुरा ह वै यत्र संयेतिरे उभये प्राजापत्याः, तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्याम इति ॥ ११ ॥ १ ॥ ते ह नासिक्यं प्राणमुद्गीथमुपासाञ्चक्रिरे, तꣳ हासुराः पाप्मना विविधुः, तस्मात्तेनोभयं जिघ्रति सुरभि च दुर्गन्धि च; पाप्मना ह्येष विद्धः ॥ १२ ॥ २ ॥ अथ ह वाचमुद्गीथमुपासाञ्चक्रिरे, ताꣳ हासुराः पाप्मना विविधुः, तस्मात्तयोभयं वदति सत्यञ्चानृतञ्च, पाप्मना ह्येषा विद्धा ॥ १३ ॥ ३ ॥ अथ ह चक्षुरुद्गीथमुपासाञ्चक्रिरे, तद्धासुराः पाप्मना विविधुः, तस्मात्तेनोभयं पश्यति-दर्शनीयञ्चादर्शनीयञ्च, पाप्मना ह्येतद् विद्धम् ॥ १४ ॥ ४ ॥ अथ ह श्रोत्रमुद्गीथमुपासाञ्चक्रिरे, तद्धासुराः पाप्मना विविधुः तस्मात्तेनोभयꣳ शृणोति, श्रवणीयञ्चाश्रवणीयञ्च, पाप्मना ह्येतद् विद्धम् ॥ १५ ॥ ५ ॥ अथ ह मन उद्गीथमुपासाञ्चक्रिरे, तद्धासुराः पाप्मना विविधुः, तस्मात्तेनोभयꣳ सङ्कल्पयते सङ्कल्पनीयञ्चासङ्कल्पनीयञ्च; पाप्मना ह्येतद् विद्धम् ॥ १६ ॥ ६ ॥ अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे, तꣳ हासुरा ऋत्वा विदध्वसुर्यथाऽश्मानमाखणमृत्वा विध्वꣳसेत ॥ १७ ॥ ७ ॥ एवं यथाऽश्मानमाखणमृत्वा विध्वꣳसते, य एवं विदि पापं कामयते, यश्चैनमभिदासति; स एषोऽश्माखणः ॥ १८ ॥ ८ ॥ नैवैतेन सुरभि न दुर्गन्धि विजानात्यपहतपाप्मा ह्येषः, तेन यदश्नाति

यत् पिबति तेनेतरान् प्राणानवति। एतमु एवान्ततोऽवित्त्वोत्क्रामति व्याददात्येवान्तत इति ॥१९॥९॥ त ँ हाङ्गिरा उद्गीथमुपासाञ्चक्रे एतमु एवाङ्गिरसं मन्यन्ते अङ्गानां यद्रसः ॥२०॥१०॥ तेन त ँ ह बृहस्पतिरुद्गीथमुपासाञ्चक्रे; एतमु एव बृहस्पतिं मन्यन्ते, वाग्घि बृहती; तस्या एष पतिः ॥ २१ ॥ ११ ॥ तेन त ँ हायास्यमुद्गीथमुपासाञ्चक्रे; एतमु एवायास्यं मन्यन्ते, आस्याद्यदयते ॥२२ ॥१२॥ तेन त ँ ह बको दाल्भ्यो विदाञ्चकार। स ह नैमिषीयाना-मुद्गाता बभूव; सह स्मैभ्यः कामानागायति ॥ २३ ॥ १३ ॥ आगाता ह वै कामानां भवति, य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते; इत्य-ध्यात्मम् ॥ २४ ॥ १४ ॥

इति द्वितीयः खण्डः ॥ २ ॥

तृतीयः खण्डः।

अथाधिदैवतम्—य एवासौ तपति, तमुद्गीथमुपासीत. उद्यन् वा एष प्रजाभ्य उद्गायति। उद्य ँ स्तमो भयमपहन्त्यपहन्ता ह वै भयस्य तमसो भवति, य एवं वेद ॥ २५ ॥ १ । समान उ एवाय-ञ्चासौ च, उष्णोऽयमुष्णोऽसौ, स्वर इतीममाचक्षते स्वर इति प्रत्या-स्वर इत्यमुं, तस्माद्वा एतमिमममुञ्चोद्गीथमुपासीत ॥ २६ ॥ २ ॥ अथ खलु व्यानमेवोद्गीथमुपासीत; यद्वै प्राणिति स प्राणो यदपा-निति सोऽपानः। अथ यः प्राणापानयोः सन्धिः स व्यानः, यो व्यानः सा वाक्। तस्मादप्राणन्ननपानन् वाचमभिव्याहरति ॥ २७ ॥ ३ ॥

या वाक् सर्क्, तस्मादप्राणन्ननपानन्नृचमभिव्याहरति; यर्क्

तत् साम, तस्मादप्राणन्ननपानन् साम गायति; यत् साम, स उद्गीथः, तस्मादप्राणन्ननपानन्नुद्गायति ॥ २८ ॥ ४ ॥ अतो यान्यन्यानि वीर्यवन्ति कर्म्माणि-यथाग्नेर्मन्थनमाजेः सरणं दृढस्य धनुष आयमनम्, अप्राणन्ननपान ँ स्तानि करोत्येतस्य हेतोर्व्यानमेवोद्गीथमुपासीत ॥ २९ ॥ ५ ॥ अथ खल्वुद्गीथाक्षराण्युपासीत—उद्गीथ इति, प्राण एवोत्, प्राणेन ह्युत्तिष्ठति वाग् गीः, वाचो ह गिर इत्याचक्षते, अन्नं थम्, अन्ने हीद ँ सर्व ँ स्थितम् ॥ ३० ॥ ६ ॥ द्यौरेवोद् अन्तरिक्षं गीः पृथिवीथम्; आदित्य एवोद् वायुर्गीरग्निस्थ ँ सामवेद एवोद् यजुर्वेदो गीः ऋग्वेदस्थं दुग्धेऽस्मै वाग् दोहं यो वाचो दोहः, अन्नवानन्नादो भवति, य एतान्येवं विद्वानुद्गीथाक्षराण्युपास्ते--उद्--गीथ इति ॥ ३५ ॥ ७ ॥ अथ खल्वाशीः समृद्धिरुपसरणानीत्युपासीत, येन साम्ना स्तोष्यन् स्यात् तत् सामोपधावेत् ॥ ३१ ॥ ८ ॥ यस्यामृचि तामृचं यदार्षेयं तमृषिं यां देवतामभिष्टोष्यन् स्यात् तां देवतामुपधावेत् ॥ ३३ ॥ ९ ॥ येन छन्दसा स्तोष्यन् स्यात् तच्छन्द उपधावेद् येन स्तोमेन स्तोष्यमाणः स्यात् त ँ स्तोममुपधावेत् ॥ ३४ ॥ १० ॥ यां दिशमभिष्टोष्यन् स्यात् तां दिशमुपधावेत् ॥ ३५ ॥ ११ ॥ आत्मानमन्तत उपसृत्य स्तुवीत कामं ध्यायन्नप्रमत्तः ; अभ्याशो ह यदस्मै स कामः समृध्येत यत्कामः स्तुवीतेति यत् कामः स्तुवीतेति ॥ ३६ ॥ १२ ॥

इति तृतीयः खण्डः ॥ ३ ॥

चतुर्थः खण्डः ।

ओमित्येतदक्षरमुद्गीथ मुपासीत; ओमिति ह्युद्गायति, तस्यो-

पन्याख्यानम् ॥ ३७ ॥ १ ॥ देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशन्, ते छन्दोभिरच्छादयन्; यदेभिरच्छादय ँ स्तच्छन्दसां छन्दस्त्वम् ॥ ३८ ॥ २ ॥ तानु तत्र मृत्युर्यथा मत्स्यमुदके परिपश्येदेवं पर्य्यपश्यद् ऋचि साम्नि यजुषि । ते नु विदित्वोर्ध्वा ऋचः साम्नो यजुषः स्वरमेव प्राविशन् ॥ ३९ ॥ ३ ॥ यदा वा ऋचमाप्नोत्योमित्येवाति स्वरति एव ँ सामैवं यजुः, एष उ स्वरो यदेतदक्षरमेतदमृतमभयं, तत् प्रविश्य देवा अमृता अभया अभवन ॥ ४० ॥ ४ ॥ स य एतदेवं विद्वानक्षरं प्रणौत्येत देवाक्षर ँ स्वरममृतमभयं प्रविशति, तत् प्रविश्य यदमृता देवास्तदमृतो भवति. ॥ ४१ ॥ ५ ॥

इति चतुर्थः खण्डः । ४ ॥

पञ्चमः खण्डः

अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इति, असौ वा आदित्य उद्गीथ एष प्रणव ओमिति ह्येष स्वरन्नेति ॥ ४२ ॥ १ ॥ एतमु एवाहमभ्यगासिषं, तस्मान्मम त्वमेकोऽसीति ह कौषीतकिः पुत्रमुवाच, रश्मींस्त्वं पर्यावर्त्तयाद् बहवो वै ते भविष्यन्तीत्यधिदैवतम् । ४३ ॥ २ ॥ अध्यात्मम्—य एवायं मुख्यः प्राणमुद्गीथ मुपासीत, ओमिति ह्येष स्वरन्नेति ॥४४ ॥ ३ एतमु एवाहमभ्यगासिषं, तस्मान्मम त्वमेकोऽसीति ह कौषीतकिः पुत्रमुवाच; प्राण ँ स्त्वं भूमानमभिगायतात्; बहवो वै मे भविष्यन्तीति ॥ ४५ ॥ ४॥ अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स

उद्गीथ इति होतृपदनाद्धेवापि दुरुद्गीत मनुसमाहरतीत्यनुसमाहरतीति । ४६ । ५ ॥

इति पञ्चमः खण्डः ॥ ५ ॥

षष्ठः खण्डः

इयमेवर्गग्निः साम तदेतदेतस्यामृच्यध्यूढꣳ साम, तस्मादृच्यध्यूढꣳ साम गीयते; इयमेव सा, अग्निरमस्तत् साम ॥४७॥१॥ अन्तरिक्षमेवर्ग्वायुः साम तदेतदेतस्यामृच्यध्यूढꣳ साम, तस्मादृच्यध्यूढꣳ साम गीयते । अन्तरिक्षमेव सा वायुरमस्तत् साम ॥ ४८ । २ द्यौरेवर्गादित्यः साम तदेतदेतस्यामृच्यध्यूढꣳ साम, तस्मादृच्यध्यूढꣳ साम गीयते; द्यौरेव सा, आदित्योऽमस्तत् साम ॥ ४९ । ३ ॥ नक्षत्राण्येवर्क् चन्द्रमाः साम, तदेतस्यामृच्यध्यूढꣳ साम, तस्मादृच्य ध्यूढꣳ साम गीयते । नक्षत्राण्येव सा चन्द्रमा अमः, तत् साम ॥ ५० ॥ ४ ॥ अथ यदेतदादित्यस्य शुक्लं भाः सैवर्ग् अथ यन्नीलं परः कृष्णं तत् साम, तदेतदेतस्यामृच्यध्यूढꣳ साम, तस्मादृच्यध्यूढꣳ साम गीयते ॥५१। ५॥ अथ यदेवैतदादित्यस्य शुक्लं भाः सैव सा, अथ यन्नीलं परः कृष्णं तदमः--तत् साम; अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आ प्रणखात् सर्व एव सुवर्णः ॥ ५२ ॥ ६ ॥ तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी, तस्योदिति नाम, स एष सर्वेभ्यः पाप्मभ्य उदितः उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद ॥ ५३ ॥ ७ ॥ तस्यर्क् च साम च गेष्णौ, तस्मादुद्गीथस्तस्मात्त्वेवोद्गाता, एतस्य हि गाता, स एष ये

चामुष्मात् पराञ्चो लोकास्तेषां चेष्टे देवकामानां चेत्यधिदैवतम् ॥ ५४ ॥ ८ ॥

इति षष्ठः खण्डः ॥ ६ ॥

सप्तमः खण्डः ।

अथाध्यात्मम् वागेवर्क् प्राणः साम, तदेतदेतस्यामृच्यध्यूढ७ँ साम, तस्मादृच्यध्यूढ७ँ साम गीयते । वागेव सा प्राणोऽमस्तत् साम ॥ ५५॥१॥चक्षुरेवर्गात्मा साम, तदेतदेतस्यामृच्यध्यूढ७ँ साम, तस्मादृच्यध्यूढ७ँसाम गीयते । चक्षुरेव सात्मामस्तत् साम ॥५६॥२॥ श्रोत्रमेवर्ङ्मनः साम तदेतदेतस्यामृच्यध्यूढ७ँ साम, तस्मादृच्यध्यूढ७ँ साम गीयते । श्रोत्रमेव सा, मनोऽमस्तत् साम ॥५७ ॥ ३ ॥ अथ यदेतदक्ष्णः शुक्लं भाः, सैवर्गथ यन्नीलं परः कृष्णं तत् साम, तदेतदेतस्यामृच्यध्यूढ७ँसाम, तस्मादृच्यध्यूढ ७ँसाम गीयते । अथ यदेवैतदक्ष्णः शुक्लं भाः, सैव साथ यन्नीलं परः कृष्णं, तदमस्तत् साम ॥ ५८ ॥ ४ ॥ अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते सैवर्क् तत् साम तदुक्थं तद्यजुस्तद्ब्रह्म, तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम॥५९॥५॥ स एष ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानाञ्चेति । तद्य इमे वीणायां गायन्त्येतं ते गायन्ति, तस्मात्ते धनसनयः ॥ ६०॥ ६ ॥ अथ य एतदेवं विद्वान् साम गायत्युभौ स गायति । सोऽमुनैव स एष ये चामुष्मात् पराञ्चो लोकास्ता७ँ आप्नोति देवकामा७ँश्च ॥ ६१ ॥ ७ ॥ अथानेनैव ये चैतस्मादर्वाञ्चो लोकास्ता७ँश्चाप्नोति मनुष्य कामा७ँश्च; तस्मादु हैवंविदुद्गाता ब्रूयात् ॥६२॥८॥ कं ते काममागायानी-

स्येष ह्येव कामागानस्येष्टे, य एतदेवं विद्वान् साम गायति साम गायति ॥ ६३ ॥ ६ ॥

इति सप्तमः खण्डः ॥ ७ ॥

अष्टमः खण्डः ।

त्रयो होद्गीथे कुशला बभूवुः—शिलकः शालावत्यश्चैकितायनो दाल्भ्यः प्रवाहणो जैवलिरिति, ते होचुरुद्गीथे वै कुशलाः स्मो हन्तोद्गीथे कथां वदाम इति ॥६४॥१॥ तथेति ह समुपविविशुः, स ह प्रवाहणो जैवलिरुवाच—भगवन्तावग्रे वदतां ब्राह्मणयोर्वदतोर्वाच ँ श्रोष्यामीति ॥ ६५ ॥ २ ॥ स ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच हन्त त्वा पृच्छानीति, पृच्छेति होवाच ॥ ६६ ॥ ३ ॥ का साम्नो गतिरिति, स्वर इति होवाच; स्वरस्य का गतिरिति, प्राण इति होवाच; प्राणस्य का गतिरित्यन्नमिति होवाच, अन्नस्य का गतिरित्याप इति होवाच ॥ ६७ ॥ ४ ॥ अपां का गतिरित्यसौ लोक इति होवाच, अमुष्य लोकस्य का गतिरिति, न स्वर्गं लोकमतिनयेदिति होवाच; स्वर्गं वयं लोक ँ सामाभिसंस्थापयामः स्वर्गसँस्ताव ँ हि सामेति ॥ ६८ ॥ ५ ॥ तँ ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच, अप्रतिष्ठितं वै किल ते दाल्भ्य साम, यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति॥ ६९ ॥ ६ ॥ हन्ताहमेतद्भगवतो वेदानीति, विद्धीति होवाच, अमुष्य लोकस्य का गतिरित्ययं लोक इति होवाच, अस्य लोकस्य का गतिरिति न प्रतिष्ठां लोकमतिनयेदिति होवाच, प्रतिष्ठां वयं लोक ँ सामाभिस ँ स्थापयामः, प्रतिष्ठा सँस्ताव ँ हि सामेति ॥ ७० ॥ ७ ॥ तँ ह प्रवाहणो

जैवलिरुवाच, अन्तवद्वै किल ते शालावत्य साम; यस्त्वेतर्हि ब्रूया-न्मूर्द्धा ते विपतिष्यतीति, मूर्द्धा ते विपतेदिति । हन्ताहमेतद्भगवतो वेदानीति, विद्धीति होवाच ।। ७१ ।। ८ ।

इति अष्टमः खण्डः ।। ८ ।।

नवमः खण्डः ।

अस्य लोकस्य का गतिरित्याकाश इति होवाच; सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम् ।। ७२ ।। १ ।।स एष परोवरीया-नुद्गीथः स एषोऽनन्तः; परोवरीयो हास्य भवति परोवरीयसो ह लोकाञ्जयति, य एतदेवं विद्वान् परोवरीया ꣳसमुद्गीथमुपास्ते ।। ७३ ।। २ ।। त ꣳ हैतमतिधन्वा शौनक उदरशाण्डिल्यायोक्त्वो-वाच—यावत्त एनं प्रजायामुद्गीथं वेदिष्यन्ते, परोवरीयो हैभ्यस्तावद-स्मिँल्लोके जीवनं भविष्यति।। ७३ ।। ३ ।। तथामुष्मिँल्लोके लोक इति, स य एतदेवं विद्वानुपास्ते परोवरीय एव हास्यास्मिँल्लोके जीवनं भवति, तथामुष्मिँल्लोके लोक इति, लोके लोक इति ।। ७४ ।। ४ ।।

इति नवमः खण्डः ।। ९ ।।

दशमः खण्डः

मटचीहतेषु कुरुष्वाटिक्या सह जाययोषस्तिर्ह चाक्रायण इभ्य ग्रामे प्रद्राणक उवास ।। ७५ ।। १ ।। स हेभ्यं कुल्माषान् खादन्तं बिभिक्षे त ꣳ होवाच— नेतोऽन्ये विद्यन्ते, यच्च ये म इम उपनिहिता इति ।।७६।। २ ।।एतेषां मे देहीति होवाच, तानस्मै प्रददौ, हन्तानुपान मिति, उच्छिष्टं वै मे पीत ꣳ स्यादिति होवाच ।। ७७ ।। ३ ।। न

स्विदेतेऽप्युच्छिष्टा इति न वा अजीविष्यमिमानखादन्निति होवाच कामो म उदपानमिति ॥ ७८ ॥ ४ ॥ स ह खादित्वातिशेषान् जायाया आजहार, साग्र एव सुभिक्षा बभूव, तान् प्रतिगृह्य निदधौ ॥ ७९ ॥ ५ ॥ स ह प्रातः सञ्जिहान उवाच — यद्बतान्नस्य लभेमहि, लभेमहि धनमात्रां राजासौ यक्ष्यते, स मा सर्वैरार्त्विज्यैर्वृणीतेति ॥ ८० ॥ ६ ॥ तं जायोवाच हन्त पत इम एव कुल्माषा इति, तान् खादित्वामुं यज्ञं विततमेयाय ॥ ८१ ॥ ७ ॥ तत्रोद्गातॄनास्तावे स्तोष्यमाणानुपोपविवेश । स ह प्रस्तोतारमुवाच ॥ ८२ ॥ ८ ॥ प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता, तां चेदविद्वान् प्रस्तोष्यसि, मूर्द्धा ते विपतिष्यतीति ॥ ८३ ॥ ९ ॥ एवमेवोद्गातारमुवाचोद्गातर्या देवतोद्गीथमन्वायत्ता तां चेदविद्वानुद्गास्यसि मूर्द्धा ते विपतिष्यतीति ॥ ८४ ॥ १० ॥ एवमेव प्रतिहर्त्तारमुवाच । प्रतिहर्त्तर्या देवता प्रतिहारमन्वायत्ता तां चेदविद्वान् प्रतिहरिष्यसि मूर्द्धा ते विपतिष्यतीति, ते ह समारतास्तूष्णीमासाञ्चक्रिरे ॥ ८५ ॥ ११ ॥

इति दशमः खण्डः ॥ १० ॥

एकादशः खण्डः ।

अथ हैनं यजमान उवाच । भगवन्तं वा अहं विविदिषाणीति, उषस्तिरस्मि चाक्रायण इति होवाच ॥ ८५ ॥ १ ॥ स होवाच भगवन्तं वा अहमेभिः सर्वैरार्त्विज्यैः पर्य्यैषिषम् । भगवतो वा अहमवित्त्यान्यानवृषि ॥ ८६ ॥ २ ॥ भगवांस्त्वेव मे सर्वैरार्त्विज्यैरिति, तथेत्यथ तर्ह्येत एव समतिसृष्टाः स्तुवताम् । यावत्त्वेभ्यो धनं दद्यास्तावन्मम दद्या इति । तथेति ह यजमान उवाच ॥ ८७ ॥ ३ ॥

अथ हैनं प्रस्तोतोपससाद, प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता, ताञ्चेदविद्वान् प्रस्तोष्यसि मूर्द्धा ते विपतिष्यतीति मा भगवान वोचत् कतमा सा देवतेति ॥ ८८ ॥ ४ ॥ प्राण इति होवाच, सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते, सैषा देवता प्रस्तावमन्वायत्ता, ताञ्चेदविद्वान प्रास्तोष्यो मूर्द्धा ते व्यपतिष्यत्, तथोक्तस्य मयेति ॥ ८९ ॥ ५ ॥ अथ हैनमुद्गातोपससाद, उद्गातर्या देवतोद्गीथमन्वायत्ता ताञ्चेदविद्वानुद्गास्यसि मूर्द्धा ते विपतिष्यतीति मा भगवानवोचत्; कतमा सा देवतेति ॥ ९० ॥ ६ ॥ आदित्य इति होवाच, सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैः सन्तं गायन्ति, सैषा देवतोद्गीथमन्वायत्ता ताञ्चेदविद्वानुदगास्यो मूर्द्धा ते व्यपतिष्यत् तथोक्तस्य मयेति ॥ ९१ ॥ ७ ॥ अथ हैनं प्रतिहर्त्तोपससाद, प्रतिहर्त्तर्या देवता प्रतिहारमन्वायत्ता, ताञ्चेदविद्वान् प्रतिहरिष्यसि मूर्द्धा ते विपतिष्यतीति मा भगवानवोचत्; कतमा सा देवतेति ॥ ९२ ॥ ८ ॥ अन्नमिति होवाच ; सर्वाणि ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीवन्ति, सैषा देवता प्रतिहारमन्वायत्ता, ताञ्चेदविद्वान् प्रत्यहरिष्यो मूर्द्धा ते व्यपतिष्यत् तथोक्तस्य मयेति तथोक्तस्य मयेति ॥ ९३ ॥ ९

इति एकादशः खण्डः ॥ ११ ॥

द्वादशः खण्डः ॥

अथातः शौव उद्गीथः, तद्ध वको दाल्भ्यो ग्लावो वा मैत्रेयः स्वाध्यायमुद्व्राज ॥ ९४ ॥ १ ॥ तस्मै श्वा श्वेतः प्रादुर्बभूव, तमन्ये

श्वान उपसमेत्योचुरन्नं नो भगवानागायतु अशनायाम वा इति ॥ ९५ ॥ १ ॥ तान् होवाचेहैव मा प्रातरुपसमीयातेति । तद्ध वको दाल्भ्यो ग्लावो वा मैत्रेयः प्रतिपालयाञ्चकार ॥ ९६ ॥ २ ॥ ते ह यथैवेदं वहिष्पवमानेन स्तोष्यमाणाः सꣳरब्धाः सर्पन्तीत्येवमास-सृपुस्ते ह समुपविश्य हिं चक्रुः ॥ ९७ ॥ ४ ॥ ओ ३ मदा ३ मोम् ३ पिबा ३ मोम् ३ देवो वरुणः प्रजापतिः सविता २ न्नमिहा २ हरदन्नपते ३ ऽन्नमिहा २ हरा २ हरो ३ मिति ॥ ९८ ॥ ५ ।

इति द्वादशः खण्डः ॥ १२ ॥

त्रयोदशः खण्डः ॥

अयं वाव लोको हाउकारो वायुर्हाइकारश्चन्द्रमा अथकारः । आत्मेहकारोऽग्निरीकारः ॥ ९९ ॥ १ ॥ आदित्य ऊकारो निहव एकारो विश्वेदेवा औहोयिकारः प्रजापतिर्हिंकारः प्राणः स्वरोऽन्नं या वाऽग्विराट् ॥ १०० ॥ २ ॥ अनिरुक्तस्त्रयोदशः स्तोभः सञ्चरो हुंकारः ॥ १०१ ॥ ३ ॥ दुग्धेऽस्मै वाग् दोहं यो वाचो दोहः, अन्न-वानन्नादो भवति, य एतामेव ꣳ साम्नामुपनिषदं वेदोपनिषदं वेदेति ॥ १०२ ॥ ४ ।

इति त्रयोदशः खण्डः ॥

इति प्रथमोऽध्यायः ॥

द्वितीयोऽध्यायः ।

—•०*—

प्रथमः खण्डः ॥

समस्तस्य खलु साम्न उपासन ँ साधु, यत् खलु साधु तत् सामेत्याचक्षते, यदसाधु तदसामेति ॥ १०३ ॥ १ ॥ तदुताप्याहुः साम्नैनमुपागादिति—साधुनैनमुपागादित्येव तदाहुरसाम्नैनमुपागादित्यसाधुनैनमुपागादित्येव तदाहुः ॥ १०४ ॥ २ ॥ अथोताप्याहुः साम नो बतेति, यत साधु भवति साधु बतेत्येव तदाहुः । असाम नो बतेति यदसाधु भवत्या साधुबतेत्येव तदाहुः ॥ १०५ ॥ ३ ॥ स य एतदेवं विद्वान् साधु सामेत्युपास्तेऽभ्याशो ह यदेन ँ साधवो धर्म्मा आ च गच्छेयुरुप च नमेयुः ॥ १०६ ॥ ४ ।

इति प्रथमः खण्डः ।

द्वितीयः खण्डः ।

लोकेषु पञ्चविध ँ सामोपासीत; पृथिवी हिङ्कारः । अग्निः प्रस्तावोऽन्तरिक्ष मुद्गीथ आदित्यः प्रतिहारो द्यौ निधन मित्यूर्द्ध्वेषु ॥ १०८ ॥ १ ॥ अथावृत्तेषु द्यौर्हिङ्कार आदित्यः प्रस्तावोऽन्तरिक्ष मुद्गीथोऽग्निः प्रतिहारः पृथिवी निधनम् ॥ १०९ ॥ २ ॥ कल्पन्ते हास्मै लोका ऊर्द्ध्वाश्चावृत्ताश्च, य एतदेवं विद्वाल्लोँकेषु पञ्चविधं सामोपास्ते ॥ ११० ॥ ३ ॥

इति द्वितीयः खण्डः ।

तृतीयः खण्डः ।

वृष्टौ पञ्चविध ँ सामोपासीत, पुरोवातो हिङ्कारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहार उद्गृह्णाति तन्निधनम् ॥ १११ ॥ १ ॥ वर्षति हास्मै वर्षयति ह य एतदेवं विद्वान् वृष्टौ पञ्चविध ँ सामोपास्ते ॥ ११२ ॥ २ ॥

इति तृतीयः खण्डः ।

चतुर्थः खण्डः ।

सर्वास्वप्सु पञ्चविध ँ सामोपासीत, मेघो यत् संप्लवते स हिङ्कारो यद्वर्षति स प्रस्तावो याः प्राच्यः स्यन्दन्ते स उद्गीथो याः प्रतीच्यः स प्रतिहारः समुद्रो निधनम् ॥ ११३ ॥ १ ॥ न हाप्सु प्रैत्यप्सुमान् भवति; य एतदेवं विद्वान् सर्वास्वप्सु पञ्चविध ँ सामोपास्ते ॥ ११४ ॥ २ ॥

इति चतुर्थः खण्डः ॥ ४ ॥

पंचमः खण्डः ।

ऋतुषु पञ्चविध ँ सामोपासीत; वसन्तो हिङ्कारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत् प्रतिहारो हेमन्तो निधनम् ॥ ११५ ॥ १॥ कल्पन्ते हास्मा ऋतवः, ऋतुमान् भवति; य एतदेवं विद्वानृतुषु पञ्चविध ँ सामोपास्ते ॥ ११६ ॥ ५ ॥

इति पञ्चमः खण्डः ।

षष्ठः खण्डः ।

पशुषु पञ्चविध ꣳ सामोपासीत, अजा हिंकारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनम् ॥ ११७ ॥ १॥ भवन्ति हास्य पशवः पशुमान् भवति य एतदेवं विद्वान् पशुष पञ्चविध ꣳ सामोपास्ते ॥ ११८ ॥ २ ॥

इति षष्ठः खण्डः ।

सप्तमः खण्डः ।

प्राणेषु पञ्चविध ꣳ परोवरीयः सामोपासीत प्राणो हिङ्कारो वाक् प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारो मनो निधनं, परोवरीया ꣳ सि वा एतानि ॥ ११९ ॥ १ परोवरीयो हास्य भवति परोवरीयसो ह लोकान् जयति, य एतदेवं विद्वान् प्राणेषु पञ्चविधं परोवरीयः सामोपास्त इति तु पञ्चविधस्य ॥ १२० ॥ २

इति सप्तमः खण्डः ।

अष्टमः खण्डः ।

अथ सप्त विधस्य, वाचि सप्तविध ꣳ सामोपासीत, यत् किञ्च वाचो हुमिति, स हिङ्कारो यत् प्रेति स प्रस्तावो यदेति स आदिः ॥ १२१ ॥ १ ॥यदुदिति स उद्गीथो यत् प्रतीति स प्रतिहारो यदुपेति स उपद्रवो यन्नीति तन्निधनम् ॥ १२२ ॥ २ दुग्धेऽस्मै वाग्दोहं या वाचो दोहः अन्नवानन्नादो भवति य एतदेवं विद्वान् वाचि सप्तविध ꣳ सामोपास्ते ॥ १२३ ॥ ३ ॥

अष्टमः खण्डः ।

नवमः खण्डः ।

अथ खल्वमुमादित्यꣳसप्तविधꣳसामोपासीत सर्वदा समस्तेन साम, मां प्रति मां प्रतीति सर्वेण समस्तेन साम ॥१२४॥१॥ तस्मिन्निमानि सर्वाणि भूतान्यन्वायत्तानीति विद्यात्; तस्य यत् पुरोदयात् स हिङ्कारस्तदस्य पशवोऽन्वायत्तास्तस्मात्ते हिं कुर्वन्ति हिङ्कार भाजिनो ह्येतस्य साम्नः ॥ १२५ ॥ २ ॥ अथ यत् प्रथमोदिते स प्रस्तावः; तदस्य मनुष्या अन्वायत्ताः ; तस्मात्ते प्रस्तुतिकामाः प्रशꣳसा कामाः; प्रस्तावभाजिनो ह्येतस्य साम्नः ॥ १२६ ॥ ३ ॥ अथ यत् सङ्गववेलाया ꣳ स आदिस्तदस्य वया ꣳसि अन्वायत्तानि; तस्मात्तान्यन्तरिक्षेऽनारम्बणान्यादायात्मानं परिपतन्ति आदिभाजीनि ह्येतस्य साम्नः ॥ १२७ ॥ ४ ॥ अथ यत् सम्प्रति मध्यन्दिने स उद्गीथस्तदस्य देवा अन्वायत्ताः; तस्मात्ते सत्तमाः प्राजापत्यानाम्, उद्गीथभाजिनो ह्येतस्य साम्नः ॥ १२८ ॥ ५ ॥ अथ यदूर्द्ध्वं मध्यन्दिनात् प्रागपराह्णात् स प्रतिहारः, तदस्य गर्भा अन्वायत्तास्तस्मात्ते प्रतिहृता नावपद्यन्ते; प्रतिहार भाजिनो ह्येतस्य साम्नः ॥ १२८ ॥ ६ ॥ अथ यदूर्द्ध्वमपराह्णात् प्रागस्तमयात् स उपद्रवः, तदस्यारण्या अन्वायत्ता स्तस्मात्ते पुरुषं दृष्ट्वा कक्षꣳ श्वभ्रमित्युपद्रवन्ति, उपद्रव भाजिनो ह्येतस्य साम्नः ॥ १२९ ॥ ७ ॥ अथ यत् प्रथमास्तमिते तन्निधनं, तदस्य पितरोऽन्वायत्तास्तस्मात्तान् निदधति; निधन भाजिनो ह्येतस्य साम्नः एवम् खल्वमुमादित्य ꣳ सप्तविध ꣳ सामोपास्ते ॥ १३० ॥ ८ ॥

इति नवमः खण्डः ।

दशमः खण्डः ।

अथ खल्वात्मसम्मितमतिमृत्यु सप्तविध ँ् सामोपासीत । हिङ्कार इति त्र्यक्षरं प्रस्ताव इति त्र्यक्षरं, तत् समम् ॥ १३१ ॥ १ ॥ आदिरिति द्व्यक्षरं प्रतिहार इति चतुरक्षरम्, तत इहैकं तत् समम् ॥१३२॥२॥ उद्गीथ इति त्र्यक्षरमुपद्रव इति चतुरक्षरं; त्रिभिस्त्रिभिः समं भवत्यक्षरमतिशिष्यते, त्र्यक्षरं तत् समम् ॥ १३३ ॥३ ॥निधनमिति त्र्यक्षरं तत् सममेव भवति तानि ह वा एतानि द्वाविँ्शतिरक्षराणि ॥ १३४ ॥ ४ ॥ एकविँ्शत्यादित्यमाप्नोत्येकविँ्शो वा इतोऽसावादित्यो द्वाविँ्शेन परमादित्याज्जयति तन्नाकं तद्विशोकम् ॥ १३५ ॥ ५ ॥ आप्नोति हादित्यस्य जयं, परोहास्यादित्य जयाज्जयो भवति, य एतदेवं विद्वानात्मसम्मितमतिमृत्यु सप्तविध ँ् सामोपास्ते सामोपास्ते ॥ १३६ ॥ ६ ॥

दशमः खण्डः ॥ १० ॥

एकादशः खण्डः

मनो हिङ्कारो वाक् प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारः प्राणो निधनम्; एतद्गायत्रं प्राणेषु प्रोतम् ॥ १३७ ॥ १ ॥ स य एवमेतद्गायत्रं प्राणेषु प्रोतं वेद, प्राणी भवति, सर्वमायुरेति ज्योग् जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या; महामनाः स्यात्; तद् व्रतम् ॥ १३८ ॥ २ ॥

इति एकादशः खण्डः ।

द्वादशः खण्डः ।

अभिमन्थति स हिङ्कारो धूमो जायते स प्रस्तावो ज्वलति स उद्गीथोऽङ्गारा भवन्ति स प्रतिहार उपशाम्यति तन्निधनᳫं संᳫं उपशाम्यति तन्निधनमेतद् रथन्तरमग्नौ प्रोतम ॥ १३९ ॥ १ स य एवमेतद् रथन्तर मग्नौ प्रोतं वेद, ब्रह्मवर्चस्यन्नादो भवति सर्वमायुरेति ज्योग् जीवति महान प्रजया पशुभिर्भवति महान् कीर्त्या; न प्रत्यङ्ङग्नि माचामेन्न निष्ठीवेन्, तद् व्रतम् ॥ १४० ॥ २

इति द्वादशः खण्डः ।

त्रयोदशः खण्डः ।

उपमन्त्रयते स हिङ्कारो जायते स प्रस्तावः स्त्रिया सह शेते स उद्गीथः प्रति स्त्रीं सह शेते स प्रतिहारः कालं गच्छति तन्निधनं पारं गच्छति तन्निधनम्, एतद्वामदेव्यं मिथुने प्रोतम् ॥ १४१ ॥ १ ॥ स य एवमेतद् वामदेव्यं मिथुने प्रोतं वेद, मिथुनी भवति मिथुनान्मिथुनात् प्रजायते सर्वमायुरेति ज्योग् जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या; न काञ्चन परिहरेत्; तद् व्रतम् ॥ १४२ ॥ २ ॥

त्रयोदशः खण्डः ।

चतुर्दशः खण्डः ।

उद्यन् हिङ्कार उदितः प्रस्तावो मध्यन्दिन उद्गीथोऽपराह्णः प्रतिहारोऽस्तं यन्निधनम्, एतद् बृहदादित्ये प्रोतम् ॥ १४३ ॥ १ । स

य एवमेतद् बृहदादित्ये प्रोतं वेद, तेजस्व्यन्नादो भवति सर्वमायुरेति ज्योग् जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्त्या । तपन्तं न निन्देत्, तद् व्रतम् ॥ १४४ ॥ २ ॥

इति चतुर्दशः खण्डः ।

पञ्चदशः खण्डः ।

अभ्राणि संप्लवन्ते स हिङ्कारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहार उद्गृह्णाति तन्निधनम्, एतद्वै रूपं पर्जन्ये प्रोतम् ॥ १४५ ॥ १ ॥ स य एवमेतद्वै रूपं पर्जन्ये प्रोतं वेद, विरूपाꣳश्च सुरूपाꣳश्च पशूनवरुन्धे, सर्वमायुरेति, ज्योग् जीवति, महान् प्रजया पशुभिर्भवति, महान् कीर्त्त्या; वर्षन्तं न निन्देत् तद् व्रतम ॥ १४६ ॥ २ ॥

इति पञ्चदशः खण्डः ।

षोडशः खण्डः ।

वसन्तो हिङ्कारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत् प्रतिहारो हेमन्तो निधनम्, एतद्वै राजमृतुषु प्रोतम् ॥ १४७ ॥ १ ॥ स य एवमेतद्वैराजमृतुषु प्रोतं वेद; विराजति प्रजया पशुभि र्ब्रह्मवर्चसेन सर्वमायुरेति ज्योग् जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्त्या; ऋतून्न निन्देत, तद् व्रतम् ॥ १४८ ॥ २ ॥

इति षोडशः खण्डः ।

सप्तदशः खण्डः ।

पृथिवी हिङ्कारोऽन्तरिक्षं प्रस्तावो द्यौरुद्गीथो दिशः प्रतिहारः समुद्रो निधनम्, एताः शक्वर्यो लोकेषु प्रोताः ॥ १४९ ॥ १ ॥ स य एवमेताः शक्वर्यो लोकेषु प्रोता वेद; लोकी भवति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या ; लोकान्न निन्देत्, तद् व्रतम् ॥ १५० ॥ २ ॥

इति सप्तदशः खण्डः ।

अष्टादशः खण्डः ।

अजा हिङ्कारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनम्, एता रेवत्यः पशुषु प्रोताः ॥ १५१ । १ ॥ स य एवमेता रेवत्यः पशुषु प्रोता वेद, पशुमान् भवति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या; पशून्न निन्देत, तद् व्रतम् ॥ १५२ ॥ २ ॥

इति अष्टादशः खण्डः ।

ऊनविंशः खण्डः ।

लोम हिङ्कारस्त्वक् प्रस्तावो मा ᳪ समुद्गीथोऽस्थि प्रतिहारो मज्जा निधनम्, एतद् यज्ञायज्ञीय मङ्गेषु प्रोतम् ॥१५३॥ १ ॥ स य एवमेतद् यज्ञायज्ञीयमङ्गेषु प्रोतं वेद अङ्गी भवति नाङ्गेन विहूर्च्छति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान्

कीर्त्या, संवत्सरं मज्ज्ञो नाश्नीयात, तद् व्रतं, मज्ज्ञो नाश्नीयादिति वा ॥ १५४ ॥ २ ॥

इति ऊनविंशः खण्डः ।

विंशः खण्डः ।

अग्निर्हिङ्कारो वायुः प्रस्ताव आदित्य उद्गीथो नक्षत्राणि प्रतिहारश्चन्द्रमा निधनम्; एतद् राजनं देवतासु प्रोतम् ॥ १५५ ॥ १ ॥ स य एवमेतद्राजनं देवतासु प्रोतं वेदैतासामेव देवताना ꣳ सलोकता ꣳ सार्ष्टिता ꣳ सायुज्यं गच्छति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या; ब्राह्मणान् न निन्देत्, तद् व्रतम् ॥ १५६ ॥ २ ॥

इति विंशः खण्डः ।

एकविंशः खण्डः ।

त्रयी-विद्या हिङ्कारस्त्रय इमे लोका स प्रस्तावोऽग्निर्वायुरादित्यः स उद्गीथो नक्षत्राणि वया ꣳ सि मरीचयः स प्रतिहारः सर्पा-गन्धर्वाःपितरस्तन्निधनम्; एतत्साम सर्वस्मिन् प्रोतम् ॥ १५७ ॥ १ ॥ स य एवमेतत् साम सर्वस्मिन् प्रोतं वेद, सर्व ꣳ ह भवति ॥१५८॥२॥ तदेष श्लोको यानि पञ्चधा त्रीणि, त्रीणि तेभ्यो न ज्यायः परमन्य-दस्ति ॥ १५९ ३ ॥ यस्तद्वेद स वेद सर्व ꣳ सर्वा दिशो बलिमस्मै हरन्ति सर्वमस्मीत्युपासीत, तद् व्रतं तद् व्रतम् ॥ १६० ॥ ४ ॥

इति एकविंशः खण्डः ।

द्वाविंशः खण्डः ।

विनर्दि साम्नो वृणे पशव्य मित्यग्ने रुद्गीथोऽनिरुक्तः प्रजापते-र्निरुक्तः सोमस्य मृदु श्लक्ष्णं वायोः श्लक्ष्णं वलवदिन्द्रस्य क्रौञ्च' वृहस्पतेरपध्वान्तं वरुणस्य, तान् सर्वानेवोपसेवेत वारुणं त्वेव वर्ज-येत् ॥ १६१ ॥ १ ॥ अमृतत्वं देवेभ्य आगायानीत्यागायेत्, स्वधां पितृभ्य आशां मनुष्येभ्यस्तृणोदकं पशुभ्यः स्वर्गं लोकं यजमाना-यान्नमात्मन आगायानीत्येतानि मनसा ध्यायन्नप्रमत्तःस्तुवीत॥१६२॥२॥ सर्वे स्वरा इन्द्रस्यात्मानः सर्व उष्माणः प्रजापतेरात्मानः सर्वे स्पर्शा मृत्योरात्मानस्तं यदि स्वरेषूपालभेतेन्द्रꣳ शरणं प्रपन्नोऽभूवम् स त्वा प्रति वक्ष्यतीत्येनं ब्रूयात्॥ १६३ ॥ ३ ॥अथ यद्येनमुष्मसूऽ-पालभेत प्रजापतिꣳ शरणं प्रपन्नोऽवन् स त्वा प्रति पेक्ष्यतीत्येनं ब्रूयात् । अथ यद्येनꣳ ःस्पर्शेषूपालभेत मृत्युꣳ शरणं प्रपन्नो-भूवम्, सत्वा प्रति धक्ष्यतीत्येनं ब्रूयात् ॥ १६४ ॥ ४ ॥ सर्वे स्वरा घोषवन्तो वलवन्तो वक्तव्याः, इन्द्रे वलं ददानीति । सर्व उष्माणोऽ-ग्रस्ता अनिरस्ता विवृता वक्तव्याः प्रजापतेरात्मानं परिददानीति, सर्वे स्पर्शा लेशेनानभिनिहिता वक्तव्या मृत्योरात्मानं परिहराणीति ॥ १६२ ॥ ५ ॥

इति द्वाविंशः खण्डः ।

त्रयो विंशः खण्डः ।

त्रयो धर्म्मस्कन्धा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्य्याचार्य्य कुलवासी तृतीयोऽत्यन्तमात्मानमाचार्य्यकुलेऽव

सादयन्, सर्वे एते पुण्यलोका भवन्ति, ब्रह्मस ऽ स्थोऽमृतत्वमेति ॥ १६६ ॥१॥ प्रजापतिर्लोकानभ्यतपत्. तेभ्योऽभितप्तेभ्यस्त्रयी विद्या सम्प्रास्रवत्, तामभ्यतपत्, तस्या अभितप्ताया एतान्यक्षराणि सम्प्रा-स्रवन्त—भूर्भुवः स्वरिति ॥ १६७ । २ ॥ तान्यभ्यतपत्, तेभ्योऽभि-तप्तेभ्य ओङ्कारः सम्प्रास्रवत्; तद् यथा शङ्कुना सर्वाणि पर्णानि संतृण्णान्येवमोङ्कारेण सर्वा वाक् संतृण्णा; ओङ्कार एवेद ऽ सर्व मोङ्कार एवेद ऽ सर्वम् ॥ १६८ ॥ ३ ॥

इति त्रयोविंशः खण्डः ।

चतुर्विंशः खण्डः ।

ब्रह्म वादिनो वदन्ति—यद्वसूनां प्रातः सवन ऽ रुद्राणां माध्य-न्दिन ऽ सवनमादित्यानाञ्च विश्वेषाञ्च देवानां तृतीय सवनम् ॥ १६९ ॥ १ ॥ क तर्हि यजमानस्य लोक इति. स यस्तं न विद्यात् कथं कुर्य्यादथ विद्वान् कुर्य्यात् ॥ १७० ॥ २ ॥ पुरा प्रात रनुवाक-स्योपाकरणाजपनेन गार्हपत्यस्योदङ्मुख उपविश्य स वासव ऽ सामाभिगायति ॥ १७१ ॥ ३ ॥ लो ३ कद्वारमपावा ३ र्णू ३ ३ पश्येम त्वा वय ऽ रा ३ ३ ३ ३ ३ हू ३ म् आ ३ ३ ज्या ३ मो ३ आ ३ २ १ १ १ इति ॥ १७२ ॥ ४ ॥ अथ जुहोति नमोऽग्नये पृथिवीक्षिते. लोकक्षिते लोकं मे यजमानाय विन्दैष वै यजमा-नस्य लोक एतास्मि ॥ १७३ ॥ ५ ॥ अत्र यजमानः परस्तादायुषः स्वाहापजहि परिघमित्यु क्त्वोत्तिष्ठति; तस्मै वसवः प्रातः सवन ऽ सम्प्रयच्छन्ति ॥ १७४ ॥ ६ ॥ पुरा माध्यन्दिनस्य सवनस्योपाक-

रणाज्जघनेनाग्नी ध्रोयस्योदङ्मुख उपविश्य स रौद्रꣳ सामाभिगायति ॥ १७५ ॥ ७ । लो ३ कद्वारमपावा ३ र्णू ३ ३ पश्येम त्वा वयं वेरा ३ ३ ३ ३ ३ हू ३ ३ आ ३ ३ ज्या ३ यो ३ आ ३ २ १ १ १ इति ॥ १७६ ॥ ८ । अथ जुहोति नमो वायवेऽन्तरिक्षक्षिते लोकक्षिते लोकं मे यजमानाय विन्दैष वै यजमानस्य लोक एतास्मि ॥ १७७ ॥ ९ ॥ अत्र यजमानः परस्तादायुषः स्वाहापजहि परिघमित्युक्त्वोत्तिष्ठति; तस्मै रुद्रा माध्यन्दिनꣳ सवनꣳ सम्प्रयच्छन्ति ॥ १७८ ॥ १० ॥ पुरा तृतीय सवनस्योपाकरणाज्जघने नाहवनीस्योदङ्मुख उपविश्य स आदित्यꣳ स वैश्वदेवꣳ सामाभिगायति ॥ १७९ ॥ ११ ॥ लो कद्वारमपावा ३ र्णू ३ ३ पश्येम त्वा वयꣳ स्वारा ३ ३ ३ ३ ३ हू ३ म् आ ३ ३ ज्या ३ यो ३ आ ३ २ १ १ १ इति ॥ १८० ॥ १२ ॥ आदित्यमथ वैश्वदेव लो ३ कद्वारमपावा ३ र्णू ३ ३ पश्येम त्वा वयꣳ साम्रा ३ ३ ३ ३ ३ हू ३ म् ३ आ ३ ३ ज्या ३ यो ३ आ ३ २ १ १ १ इति ॥ ८१ ॥ १३ ॥ अथ जुहोति नम आदित्येभ्यश्च विश्वेभ्यश्च देवेभ्यो दिविक्षिद्भ्यो लोकक्षिद्भ्यो लोकं मे यजमानाय विन्दत, एष वै यजमानस्य लोक एतास्मि ॥ १८२ ॥ १४ ॥ अत्र यजमानः परस्तादायुषः स्वाहापहत परिघमित्युक्त्वोत्तिष्ठति ॥ १८३ ॥ १५ ॥ तस्मा आदित्यश्च विश्वेच देवास्तृतीय सवनꣳ सम्प्रयच्छन्त्येष ह वै यज्ञस्य मात्रा वेद, य एवं वेद य एवं वेद ॥ १८४ ॥ १६ ॥

इति चतुर्विंशः खण्डः ।

द्वितीयोऽध्यायः समाप्तः ।

तृतीयोऽध्यायः ।

—०:०:०—

प्रथमः खण्डः ।

असौ वा आदित्यो देवमधु, तस्य द्यौरेव तिरश्चीनवꣳशोऽन्तरिक्षमपूपो मरीचयः पुत्राः ॥ १८५ ॥ १ ॥ तस्य ये प्राञ्चो रश्मयस्ता एवास्य प्राच्यो मधुनाड्यः । ऋच एव मधुकृतः ऋग्वेद एव पुष्पं, ता अमृता आप स्ता वा एता ऋचः ॥ १८६ ॥ २ ॥ एत मृग्वेदमभ्यतप ꣳ स्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्य्यमन्नाद्य ꣳ रसोऽजायत ॥ १८७ ॥ ३ ॥ तद्व्यक्षरत्तदादित्यमभितोऽश्रयत्; तद्वा एतद् यदेतदादित्यस्य रोहित ꣳ रूपम् ॥ १८८ ॥ ४ ॥

प्रथमः खण्डः ।

द्वितीयः खण्डः ।

अथ येऽस्य दक्षिणा रश्मयस्ता एवास्य दक्षिणा मधुनाड्या यजूꣳष्येव मधुकृतो यजुर्वेद एव पुष्पं, ता अमृता आपः ॥ १८९ ॥ १ ॥ तानि वा एतानि यजूꣳष्येतं यजुर्वेदमभ्यतप ꣳ स्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्य्य मन्नाद्यꣳ रसोऽजायत ॥ १९० ॥ २ ॥ तद्व्यक्षरत्तदादित्यमभितोऽश्रयत, तद्वा एतद् यदेतदादित्यस्य शुक्ल ꣳ रूपम् ॥ १९१ ॥ ३ ॥

इति द्वितीयः खण्डः ।

तृतीयः खण्डः ।

अथ येऽस्य प्रत्यञ्चो रश्मयस्ता एवास्य प्रतीच्यो मधुनाड्यः, सामान्येव मधुकृतः सामवेद एव पुष्पं, ता अमृता आपः ॥१९२॥१॥ तानि वा एतानि सामान्येत ँ सामवेदमभ्यतप ँ स्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्य्यमन्नाद्यं रसोऽजायत ॥ १९३ ॥ २ ॥ तद्व्यक्षर त्तदादित्यमभितोऽश्रयत्, तद्वा एतद्यदेतदादित्यस्य कृष्ण ँ रूपम् ॥ १९४ ॥ ३ ॥

इति तृतीयः खण्डः ।

चतुर्थः खण्डः ॥

अथ येऽस्योदञ्चो रश्मयस्ता एवास्योदीच्यो मधुनाड्योऽथर्वाङ्गिरस एव मधुकृत इतिहास पुराणपुष्पं, ता अमृता आपः ॥ १९५ ॥ १ ॥ ते वा एतेऽथर्वाङ्गिरस एतदितिहासपुराणमभ्यतप ँ स्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यं रसोऽजायत ॥ १९६ ॥ २ ॥ तद्व्यक्षरत्तदादित्यमभितोऽश्रयत्, तद्वा एतद्यदेतदादित्यस्य परं कृष्ण ँ रूपम् ॥ १९७ ॥ ३ ॥

इति चतुर्थः खण्डः ।

पञ्चमः खण्डः ।

अथ येऽस्योर्ध्वा रश्मयस्ता एवास्योर्ध्वा मधुनाड्यो गुह्या एवादेशा मधुकृतो ब्रह्मैव पुष्पं, ता अमृता आपः ॥ १९८ ॥ १ ॥ ते वा एते गुह्या आदेशा एतद् ब्रह्माभ्यतप ँ स्तस्याभितप्तस्य यशः

इन्द्रियं वोर्य्यमन्नाद्य ꣳ रसोऽजायत ॥ १९९ ॥ २ ॥ तद्व्यक्षर-दादित्यमभितोऽश्रयत; तद्वा एतद् यदेतदादित्यस्य मध्ये क्षोभत इव ॥ २०० ॥ ३ ॥ ते वा एते रसाना ꣳ रसाः, वेदा हि रसा-स्तेषामेते रसाः तानि वा एतान्यमृतानाममृतानि, वेदा ह्यमृतास्तेषा-मेतान्यमृतानि ॥ २०१ ॥ ४ ॥

इति पञ्चमः खण्डः ।

षष्ठः खण्डः ।

तद् यत् प्रथममसृतं तद् वसव उपजीवन्त्यग्निना मुखेन, न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ २०२ ॥ १ ॥ त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ॥ २०३ ॥ २ ॥ स य एतदेवामृतं वेद वसूनामेवैको भूत्वाऽग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति, स एतदेव रूपमभिसंविशत्येतस्माद् रूपादुदेति ॥२०४॥३॥ स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता वसूनामेव तावदाधिपत्यं ꣳ स्वाराज्यं पर्य्येता ॥ २०५ ॥ ४ ॥

इति षष्ठः खण्डः ।

सप्तमः खण्डः ।

अथ यद् द्वितीयममृतं, तद् रुद्रा उपजीवन्तीन्द्रेण मुखेन; न वै देवा अश्नन्ति न पिबन्त्येतदेवामृत दृष्ट्वा तृप्यन्ति ॥ २०६ ॥ १ ॥ त एतदेव रूपमभिसंविशन्त्येतस्माद् रूपादुद्यन्ति ॥ २०७ ॥ २ ॥ स य एतदेवममृतं वेद रुद्राणामेवैको भूत्वेन्द्रेणैव मुखेनैतदेवामृतं

दृष्ट्वा तृप्यति, स एतदेव रूपमभिसंविशत्येतस्माद् रूपादुदेति ॥ २०८ ॥ ३ ॥ स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता द्विस्तावद् दक्षिणत उदेतोत्तरतोऽस्तमेता; रुद्राणामेव तावदाधिपत्यꣳ स्वाराज्यं पर्य्येता ॥ २०९ ॥ ४ ॥

इति सप्तमः खण्डः ।

अष्टमः खण्डः ।

अथ यत् तृतीयममृतं, तदादित्या उपजीवन्ति वरुणेन मुखेन, न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥२१०॥१॥ त एतदेव रूपमभिसंविशन्त्येतस्माद् रूपादुद्यन्ति ॥ २११ ॥ २ ॥ स य एतदेवममृतं वेद, आदित्यानामेवैको भूत्वा, वरुणेनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति; स एतदेव रूपमभिसंविशत्येतस्माद् रूपादुदेति ॥ २१२ ॥ ३ ॥ स यावदादित्यो दक्षिणत उदेतोत्तरतोऽस्तमेता द्विस्तावत् पश्चादुदेता पुरस्तादस्तमेताऽऽदित्यानामेव तावदाधिपत्यꣳ स्वाराज्यं पर्य्येता ॥ २१३ ॥ ४ ॥

इति अष्टमः खण्डः ।

नवमः खण्डः ।

अथ यच्चतुर्थममृतं तन्मरुत उपजीवन्ति सोमेन मुखेन, न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ २१४ ॥ १ ॥ त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ॥ २१५ ॥ २ ॥ स य एतदेवामृतं वेद, मरुतामेवैको भूत्वा सोमेनैव मुखेनैतदेवामृतं

दृष्ट्वा तृप्यति, स एतदेव रूपमभिसंविशत्येतस्माद् रूपादुदेति ॥ २१६ ॥ ३ ॥स यावदादित्यः पश्चादुदेता पुरस्तादस्तमेता द्विस्त—वदुत्तरत उदेता दक्षिणतोऽस्तमेता मरुतामेव तावदाधिपत्यꣳ स्वाराज्यं पर्येता । २१७ ॥ ४ ॥

इति नवमः खण्डः ।

दशमः खण्डः ।

अथ यत् पञ्चमममृतं तत्साध्या उपजीवन्ति ब्रह्मणा मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ २१८ ॥ १ ॥ त एतदेवा रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ॥ २१९ ॥ २ ॥ स य एतदेवममृतं वेद साध्यानामेवैको भूत्वा ब्रह्मणैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ॥ २२० ॥ ३ ॥ स यावदादित्य उत्तरत उदेता दक्षिणतोऽस्तमेता द्विस्तावदूर्द्ध्व उदेताऽर्वागस्तमेता साध्यानामेव तावदाधिपत्यꣳ स्वाराज्यं पर्य्येता ॥ २२१ ॥ ४ ॥

इति दशमः खण्डः ॥ १० ॥

एकादशः खण्डः ।

अथ तत उर्द्ध्व उदेत्य नैवोदेता नास्तमेतैकलएव मध्ये स्थाता; तदेष श्लोकः ॥ २२२ ॥ १ ॥ न वै तत्र न निम्लोच नोदियाय कदाचन । देवास्तेनाꣳ सत्येन मा विराधिषि ब्रह्मणेति ॥ २२३ ॥ २॥ न ह वा अस्मा उदेति न निम्लोचति सकृद्दिवा हैवास्मै भवति, य

एतामेव ब्रह्मोपनिषदं वेद ॥ २२४ ॥ ३ ॥ तद्धैतद् ब्रह्मा प्रजापतये उवाच, प्रजापतिर्मनवे मनुः प्रजाभ्यस्तद्धैतदुद्दालकायारुणये ज्येष्ठाय पुत्राय पिता ब्रह्म प्रोवाच ॥ २२५ ॥ ४ ॥ इदं वाव तज्ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात् प्रणाय्याय वाऽन्ते वासिने ॥ २२६ ॥ ५ ॥ नान्यस्मै कस्मैचन यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां दद्यात् एतदेव ततोभूय इत्येतदेव ततो भूय इति ॥ २२७ ॥ ६ ॥

इति एकादशः खण्डः ॥ ११ ॥

द्वादशः खण्डः ।

गायत्री वा इदꣳ सर्वं भूतं यदिदं किञ्च वाग्वै गायत्री वाग्वा इदꣳ सर्वं भूतं गायति च त्रायते च ॥ २२८ ॥ १ ॥ या वै सा गायत्रीयं वाव सा—येयं पृथिव्यस्याꣳ हीदꣳ सर्वं भूतं प्रतिष्ठितमेतामेव नातिशीयते ॥ २२९ ॥ २ ॥ या वै सा पृथिवीयं वाव सा, यदिदमस्मिन् पुरुषे शरीरमस्मिन् हीमे प्राणाः प्रतिष्ठिता एतदेव नातिशीयन्ते ॥ २३० ॥ ३ ॥ यद्वै तत्पुरुषे शरीरमिदं वाव तद् यदिदमस्मिन्नन्तः पुरुषे हृदयम्, अस्मिन् हीमे प्राणाः प्रतिष्ठिता एतदेव नातिशीयन्ते ॥ २३१ ॥ ४ ॥ सैषा चतुष्पदा षड्विधा गायत्री; तदेतदृचाभ्यनुक्तम् ॥ २३२ ॥ ५ ॥ तावानस्य महिमा ततो ज्यायाꣳश्च पूरुषः । पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीति ॥ २३३ ॥ ६ ॥ यद्वै तद्ब्रह्मेतीदं वाव तद् योऽयं बहिर्धा पुरुषादाकाशः, यो वै स बहिर्धा पुरुषादाकाशः— ॥ २३४ ॥ ७ ॥ अयं वाव स योऽयमन्तः पुरुष आकाशो यो वै

सोऽन्तः पुरुष आकाशः ॥ २३५ ॥ ८ ॥ अथ वाव स योऽयमन्तर्हृदय आकाशस्तदेतत् पूर्णमप्रवर्त्ति; पूर्णामप्रवर्त्तिनी ᳪ श्रियं लभते, य एवं वेद ॥ २३६ ॥ ९ ।

इति द्वादशः खण्डः ॥ १२ ॥

त्रयोदशः खण्डः ।

तस्य ह वा एतस्य हृदयस्य पञ्च देवसुपयः; स योऽस्य प्राङ्सुषिः स प्राणस्तच्चक्षुः स आदित्यस्तदेतत्तेजोऽन्नाद्यमित्युपासीत, तेजस्व्यान्नादो भवति, य एवं वेद ॥ २३७॥ १॥ अथ योऽस्य दक्षिणः सुषिः स व्यानस्तच्छ्रोत्र ᳪ स चन्द्रमास्तदेतच्छ्रीश्चयशश्चेत्युपासीत; श्रीमान् यशस्वी भवति, य एवं वेद ॥ २३८ ॥ २ ॥ अथ योऽस्य प्रत्यङ् सुषिः, सोऽपानः सा वाक् सोऽग्निस्तदेतद् ब्रह्मवर्चसमन्नाद्यमित्युपासीत, ब्रह्मवर्चस्यन्नादो भवति, य एवं वेद ॥ २३९ ॥ ३ ॥ अथ योऽस्योदङ् सुषिः स समानस्तन्मनः स पर्जन्यः, तदेतत् कीर्त्तिश्च व्युष्टिश्चेत्युपासीतः कीर्त्तिमान् व्युष्टिमान् भवति य एवं वेद ॥ २४० ॥ ४ ॥ अथ योऽस्योर्द्ध्वःसुषिः स उदानः स वायुः स आकाशः; तदेतदोजश्च महश्चेत्युपासीत ; ओजस्वी महस्वान् भवति य एवं वेद ॥ २४१ ॥ ५ ॥ ते वा एते पञ्च ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारपाः, स य एतानेवं पञ्च ब्रह्मपुरुषान् स्वर्गस्य लोकस्य द्वारपान वेद अस्य कुले वीरो जायते; प्रतिपद्यते स्वर्गं लोकं. य एतानेवं पञ्च ब्रह्मपुरुषान् स्वर्गस्य लोकस्य द्वारपान् वेद॥ २४२ ॥ ६॥ अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्व

नुत्तमेषूत्तमेषु लोकेषु; इदं वाव तद् यदिदमस्मिन्नन्तः पुरुषे ज्योतिः ॥ २४३ ॥ ७ ॥ तस्यैषा दृष्टिः—यत्रैतदस्मिञ्छरीरे स ंस्पर्शेनोष्णिमानं विजानाति तस्यैषा श्रुतिः—यत्रैतत् कर्णावपिगृह्य निनदमिव नदथुरिवाग्नेरिव ज्वलत उपश्रृणोति तदेतद्दृष्टञ्च श्रुतञ्चेत्युपासीत; चक्षुष्यः श्रुतो भवति, य एवं वेद य एवं वेद॥ २४४ ॥८ ॥

इति त्रयोदशः खण्डः ॥ १३ ॥

चतुर्दशः खंडः ।

सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत। अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिँल्लोके पुरुषो भवति, तथेतः प्रेत्य भवति स क्रतुं कुर्वीत ॥ २४५ ॥ १ ॥ मनोमयः प्राणशरीरो भारूपः सत्यसङ्कल्प आकाशात्मा सर्वकर्म्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः ॥ २४६ ॥ २ ॥ एष म आत्मान्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाकतण्डुलाद्वा एष म आत्मान्तर्हृदये ज्यायान् पृथिव्या ज्यायनन्तरिक्षा ज्ज्यायान् दिवो ज्यायानेभ्यो लोकेभ्यः॥ २४७ ॥३॥ सर्वकर्म्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः एष म आत्मान्तर्हृदय एतद्ब्रह्मैतमितः प्रेत्याभिसम्भावितास्मीति—यस्य स्यादद्धा न विचिकित्सास्तीति ह स्माह शाण्डिल्यः—शाण्डिल्यः ॥ २४८ ॥ ४ ॥

इति चतुर्दशः खण्डः । १४

पञ्चदशः खंडः ।

अन्तरिक्षोदरः कोशो भूमिबुध्नो न जीर्य्यति, दिशोऽस्य स्रक्तयो द्यौरस्योत्तरं बिलꣳ स एष कोशो वसुधानस्तस्मिन् विश्वमिदꣳ श्रितम् ॥ २४९ ॥ १ ॥ तस्य प्राची दिग् जुहूर्नाम, सहमाना नाम दक्षिणा, राज्ञी नाम प्रतीची, सुभूता नामोदीची, तासां वायुर्वत्सः; स य एतमेवं वायुं दिशां वत्सं वेद, न पुत्ररोदꣳ रोदिति; सोऽहमेतमेवं वायुं दिशां वत्सं वेद या पुत्ररोदꣳ रुदम् ॥ २५० ॥ २ ॥ अरिष्टं कोशं प्रपद्येऽमुनाऽमुनाऽमुना, प्राणंप्रपद्य ऽमुनाऽमुनाऽमुना, भूः प्रपद्येऽमुनाऽमुनाऽमुना, भुवः प्रपद्येऽमुनाऽमुनाऽमुना, स्वः प्रपद्ये-ऽमुनाऽमुनाऽमुना ॥ २५१ ॥ ३ ॥ स यदवोचं प्राणं प्रपद्ये इति प्राणो वा इदꣳ सर्वं भूतं यदिदं किञ्च, तमेव तत् प्रापत्सि ॥ २५२ ॥ ४ ॥ अथ यदवोचं भूः प्रपद्य इति, पृथिवीं प्रपद्येऽन्तरिक्षं प्रपद्ये दिवं प्रपद्य इत्येव तदवोचम् ॥ २५३ ॥ ५ ॥ अथ यदवोचं भुवः प्रपद्य इत्यग्निं प्रपद्ये वायुं प्रपद्ये आदित्यं प्रपद्य इत्येव तदवोचम् ॥ २५४ ॥ ६ ॥ अथ यदवोचꣳ स्वः प्रपद्ये इत्यृग्वेदं प्रपद्ये यजुर्वेदं प्रपद्ये सामवेदं प्रपद्य इत्येव तदवोचं तदवोचम् ॥ २५५ ॥ ७ ॥

इति पञ्चदशः खण्डः ॥ १५

षोड़शः खण्डः ।

पुरुषो वाव यज्ञस्तस्य यानि चतुर्विꣳशतिर्वर्षाणि, तत् प्रातः सवनं, चतुर्विꣳशत्यक्षरा गायत्री, गायत्रं प्रातः सवनं, तदस्य वसवोऽन्वायत्ताः प्राणा वाव वसवः एते हीदꣳ सर्वं वासन्ति

॥ २५६ ॥ १ ॥ तञ्चेदेतस्मिन् वयसि किञ्चिदुपतपेत्, स ब्रूयात् प्राणा वसव इदं मे प्रातः सवनं माध्यन्दिनꣳसवनमनुसन्तनुतेति, माहं प्राणानां वसूनां मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो ह भवति ॥ २५७ ॥ २ ॥ अथ यानि चतुश्चत्वारिꣳ शद्वर्षाणि तन्माध्यन्दिनꣳ सवनं, चतुश्चत्वारिꣳ शदक्षरा त्रिष्टुप् त्रैष्टुभं माध्यन्दिनꣳ सवनम्; तदस्य रुद्रा अन्वायत्ताः, प्राणा वाव रुद्राः, एते हीदꣳ सर्वꣳ रोदयन्ति ॥ २५८ ॥ ३ ॥ तञ्चेदेतस्मिन वयसि किञ्चिदुपतपेत्, स ब्रूयात—प्राणा रुद्रा इदं मे माध्यन्दिनꣳ सवनं तृतीय सवन मनुसन्तनुतेति माहं प्राणानाꣳ रुद्राणां मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो ह भवति॥२५९॥४॥ अथ यान्यष्टचत्वारिꣳ शद्वर्षाणि, तत् तृतीय सवनम्; अष्टचत्वारिꣳ शदक्षराजगती; जागतं तृतीय सवनं, तदस्यादित्या अन्वायत्ताः, प्राणा वावादित्याः, एते हीदꣳ सर्वमाददते ॥ २६० ॥ ५ ॥ तञ्चेदेतस्मिन वयसि किञ्चिदुपतपेत् स ब्रूयात् प्राणा आदित्या इदं मे तृतीय सवनमायुरनुसन्तनुतेति माहं प्राणानामादित्यानां मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो हैव भवति ॥ २६१ ॥६ ॥ एतद्ध स्म वै तद्विद्वानाह महीदास ऐतरेयः—स किं म एतदुपतपसि, योऽहमनेन न प्रेष्यामीति, स ह षोडशं वर्षशतं जीवति, य एवं वेद ॥ २६२ ॥ ७ ॥

इति षोड़शः खण्डः ॥ १६ ॥

——

सप्तदशः खण्डः ।

स यदशिशिषति यत्पिपासति यन्न रमते, ता अस्य दीक्षाः ॥ २६३ ॥ १ ॥ अथ यदश्नाति यत्पिबति यद्रमते, तदुपसदैरेति ॥ २६४ ॥ २ ॥ अथ यद्धसति यज्जक्षति यन्मैथुनं चरति, स्तुत शस्त्रैरेव तदेति ॥ २६५ ॥ ३ ॥ अथ यत् तपो दानमार्ज्जवमहिꣳसा सत्यवचनमिति, ता अस्य दक्षिणाः ॥ २६६ ॥ ४ ॥ तस्मादाहुः सोष्यत्यसोष्टेति, पुनरुत्पादनमेवास्य तन्मरणमेवास्यावभृथः ॥ २६७ ॥ ५ ॥ तद्धैतद् घोर आङ्गिरसः कृष्णाय देवकीपुत्रायोक्त्वोवाचाऽपिपास एव स बभूव, सोऽन्तवेलायामेतत् त्रयं प्रतिपद्येत —अक्षितमस्यच्युतमसि प्राणसꣳशितमसीति । तत्रैते द्वे ऋचौ भवतः ॥ २६८ ॥ ६ ॥ आदित प्रत्नस्य रेतसः । उद्वयन्तमसस्परि ज्योतिः पश्यन्त उत्तरꣳ स्वः पश्यन्त उत्तरं देवं देवत्रा सूर्य्यमगन्म ज्योतिरुत्तममिति ज्योतिरुत्तममिति ॥ २६९ ॥ ७ ॥

इति सप्तदशः खण्डः ॥ १७ ॥

अष्टादशः खण्डः ।

मनो ब्रह्मेत्युपासीतेत्यध्यात्मम्; अथाधि दैवतमाकाशो ब्रह्मेति, उभयमादिष्टं भवत्यध्यात्मं चाधिदैवतं च ॥ २७० ॥ १ ॥ तदेतच्चतुष्पाद् ब्रह्म—वाक् पादः प्राणः पादः चक्षुः पादः श्रोत्रं पाद इत्यध्यात्मम्, अथाधिदैवतम्—अग्निः पादो वायुः पाद आदित्यः पादो दिशः पाद इति,उभयमेवादिष्टं भवत्यध्यात्मं चैवाधिदैवतं च ॥ २७१ ॥ २ ॥ वागेव ब्रह्मणश्चतुर्थः पादः; सोऽग्निना ज्योतिषा

भाति च तपति च । भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद ॥ २७२ ॥ ३ प्राण एव ब्रह्मण श्चतुर्थः पादः, स वायुना ज्योतिषा भाति च तपति च । भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन, य एवं वेद ॥ २७३ ॥ ४ ॥ चक्षुरेव ब्रह्मणश्चतुर्थः पादः, स आदित्येन ज्योतिषा भाति च तपति च । भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन, य एवं वेद ॥ २७४ ॥ ५ । श्रोत्रमेव ब्रह्मणश्चतुर्थः पादः, स दिग्भिर्ज्योतिषा भाति च तपति च । भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन, य एवं वेद य एवं वेद ॥ २७५ ॥ ६ ॥

इति अष्टादशः खण्डः ॥ १८ ॥

ऊनविंशः खण्डः ।

आदित्यो ब्रह्मेत्यादेशस्तस्योपव्याख्यानम् । असदेवेदमग्र आसीत्, तत् सदासीत्, तत् समभवत्तदाण्डं निरवर्त्तत; तत् सम्वत्सरस्य मात्रामशयत, तन्निरभिद्यत, ते आण्ड—कपाले रजतञ्च सुवर्णञ्चाभवताम् ॥ २७६ ॥ १ । तद् यद्रजतᳪसेयं पृथिवी, यत् सुवर्णᳪ सा द्यौर्यज्जरायु ते पर्वता: यदुल्बᳪ स्तत् समेघो नीहारो या धमनयस्ता नद्यो यद्वास्तेयमुदकᳪ स समुद्रः ॥ २७७ ॥ २ ॥ अथ अथ यत्तदजायत् सोऽसावादित्यः । तं जायमानं घोषा उलूलवोऽनूदतिष्ठन्त, सर्वाणि च भूतानि सर्वे च कामाः तस्मात् तस्योदयं प्रति प्रत्यायनं प्रत्यघोषा उलूलवोऽनुतिष्ठन्ति सर्वाणि

च भूतानि सर्वे चैव कामाः ॥ २७८ ॥ ३ ॥ स य एतमेवं विद्वा-नादित्यं ब्रह्मेत्यु पास्तेऽभ्यासो ह यदेनꣳ साधवो घोषा आ च गच्छेयुरुप च निम्रेडेन्निम्रेडन् ॥ २७९ ॥ ४ ॥

इति ऊनविंशः खण्डः ॥ १९ ॥

इति तृतीयोऽध्यायः ॥

चतुर्थोऽध्यायः ।

—:*:—

प्रथमः खण्डः ।

ॐ जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य आस ; स ह सर्वत आवसथान् मापयाञ्चक्रे सर्वत एवमेऽन्नमत् स्यन्तीति ॥ २८० ॥ १ ॥ अथ ह हꣳसा निशायामतिपेतुस्तद्धैवꣳ हꣳसो हꣳसमभ्युवाद—हो होऽयि भल्लाक्ष भल्लाक्ष, जानश्रुतेः पौत्रायणस्य समं दिवा ज्योतिराततम, तन्मा प्रसाङ्क्षीस्तत्त्वा मा प्रधाक्षीरिति ॥ २८१ ॥ २ ॥ तमु ह परः प्रत्युवाच—कम्बर एनमेतत् सन्तꣳ सयुग्वानमिव रैक्कमात्थेति, यो नु कथꣳ सयुग्वा रैक्क इति ॥ २८२ ॥ ३ ॥ यथा कृताय विजितायाधरेयाः संयन्त्येवमेनꣳ सर्वं तदभिसमेति । यत्किञ्च प्रजाः साधु कुर्वन्ति, यस्तद्वेद यत स वेद, स मयैतदुक्त इति ॥ २८४ ॥ ४ तदु ह जानश्रुतिः पौत्रायण उपशुश्राव; स ह सञ्जिहान एव क्षत्तारमुवाचाङ्गारे ह सयुग्वानमिव रैक्कमात्थेति, यो नु कथꣳ सयुग्वा रैक्क इति ॥ २८५ ॥ ५ ॥ यथा कृताय विजितायाधरेयाः संयन्त्येवमेनꣳ सर्वं तदभिसमैति यत्किञ्च प्रजाः साधु कुर्वन्ति, स यस्तद्वेद यत् स वेद, स मयैतदुक्त इति ॥ २८५ ॥ ६ ॥ स ह क्षत्तान्विष्य नाविदमिति प्रत्येयाय तꣳहोवाच यत्रारे ब्राह्मणस्यान्वेषणा तदेनमर्च्छेति ॥ २८६ ॥ ७ ॥ सोऽधस्ताच्छकटस्य पामानं कषमाणमुपोपविवेश, तꣳहाभ्युवाद—त्वं नु भगवः

सयुग्वा रैक्व इति, अहᳪ ह्यरा ३ इति ह प्रतिजज्ञे स ह क्षत्ता-विदमिति प्रत्येयाय ॥ २८७ ॥ ८ ॥

इति प्रथमः खण्डः ॥

द्वितीयः खण्डः ।

तदु ह जानश्रुतिः पौत्रायणः षट्शतानि गवां निष्कमश्वतरीरथं तदादाय प्रतिचक्रमे; तᳪ हाभ्युवाद ॥ २८८ ॥ १ ॥ रैक्वेमानि षट्शतानि गवामयं निष्कोऽयमश्वतरीरथोऽनु म एतां भगवो देवताᳪ शाधि यां देवतामुपास्स इति ॥ २८९ ॥ २ ॥ तमु ह परः प्रत्यु-वाचाह हारेत्वा शूद्र तवैव सह गोभिरस्त्विति; तदु ह पुनरेव जान-श्रुतिः पौत्रायणः सहस्रं गवां निष्कमश्वतरीरथं दुहितरं तदादाय प्रतिचक्रमे ॥ २९० ॥ ३ ॥ तᳪ हाभ्युवाद रैक्वेदᳪ सहस्रं गवामयं निष्कोऽयमश्वतरीरथं इयं जायायं ग्रामो यस्मिन्ना-स्सेऽन्वेव मा भगवः शाधीति ॥ २९१ ॥ ४ ॥ तस्या ह मुखमुपो-द्गृह्णन्नुवाचा जाहारेमाः शूद्र, अनेनैव मुखेनालापयिष्यथा इति । ते हैते रैक्वपर्णा नाम महावृषेषु यत्रास्मा उवास स तस्मै होवाच ॥ २९२ ॥ ५ ॥

इति द्वितीयः खण्डः ॥

तृतीयः खण्डः ।

वायुर्वाव संवर्गो यदा वा अग्निरुद्वायति वायुमेवाप्येति यदा सूर्य्योऽस्तमेति वायुमेवाप्येति यदा चन्द्रोऽस्तमेति वायु-

मेवाप्येति ॥ २९३ ॥ १ ॥ यदाप उच्छुष्यन्ति वायुमेवापियन्ति, वायुर्ह्येवैतान् सर्वान् संवृङ्क्त इत्यधिदैवतम् ॥ २९४ ॥ २ ॥ अथाध्यात्मम्—प्राणो वाव संवर्गः, स यदा स्वपिति प्राणमेव वागप्येति, प्राणं चक्षुः प्राणᳬ श्रोत्रं प्राणं मनः प्राणो ह्येवैतान् सर्वान् संवृङ्क्त इति ॥ २९५ ॥ ३ ॥ तौ वा एतौ द्वौ संवर्गौ वायुरेव देवेषु प्राणः प्राणेषु ॥ २९६ ॥ ४ ॥ अथ ह शौनकञ्च कापेयमभिप्रतारिणं च काक्षसेनिं परिविष्यमाणौ ब्रह्मचारी बिभिक्षे; तस्मा उ ह न ददतुः ॥ २९७ ॥ ५ ॥ स होवाच महात्मनश्चतुरो देव एकः कः स जगार भुवनस्य गोपास्तं कापेय नाभिपश्यन्ति मर्त्या अभिप्रतारिन् बहुधा वसन्तं यस्मै वा एतदन्नं तस्मा एतन्न दत्तमिति ॥ २९८ ॥ ६ ॥ तदु ह शौनकः कापेयः प्रतिमन्वानः प्रत्येयायात्मा देवानां जनिता प्रजानां हिरण्यदᳬष्ट्रो बभसोऽनसूरिर्महान्तमस्य महिमानमाहुरनद्यमानो यदनन्नमत्तीति वै ब्रह्मचारिन्नेदमुपास्महे; दत्तास्मै भिक्षामिति ॥ २९९ ॥ ७ ॥ तस्मा उ ह ददुस्ते वा एते पञ्चान्ये पञ्चान्ये दश सन्तस्तत्-कृतम्, तस्मात् सर्वासु दिक्ष्वन्नमेव दश कृतᳬ सैषा विराडन्नादी, तयेदᳬ सर्वं दृष्टᳬ सर्वमस्येदं दृष्टं भवत्यन्नादो भवति य एवं वेद य एवं वेद ॥ ३०० ॥ ८ ।

इति तृतीयः खण्डः ॥ ८ ॥

चतुर्थः खण्डः ।

सत्यकामोह जाबालो जबालां मातरमामन्त्रयाञ्चक्रे ब्रह्मचर्यं भवति विवत्स्यामि, किं गोत्रोन्वहमस्मीति ॥ ३०१ ॥ १ ॥ सा

हैनमुवाच नाहमेतद्वेद तात यद्गोत्रस्त्वमसि, बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे, साहमेतन्न वेद यद्गोत्रस्त्वमसि, जबाला तु नामाहमस्मि सत्यकामो नाम त्वमसि स सत्यकाम एव जाबालो ब्रवीथा इति ॥ ३०२ ॥ २ ॥ स ह हारिद्रुमतं गौतममेत्योवाच ब्रह्मचर्य्यं भगवति वत्स्याम्युपेयां भगवन्तमिति ॥ ३०३ ॥ ३ ॥ तꣳ होवाच किं गोत्रो नु सोम्यासीति, स होवाच नाहमेतद्वेद भो यद्गोत्रोऽहमस्मि, अपृच्छं मातरꣳ सा मा प्रत्यब्रवीद् बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे, साहमेतन्न वेद यद्गोत्रस्त्वमसि, जबाला तु नामाऽहमस्मि सत्यकामो नाम त्वमसीति; सोहꣳ सत्यकामो जाबालोऽस्मि भो इति ॥ ३०४ ॥ ४ ॥ तꣳ होवाच नैतदब्राह्मणो विवक्तुमर्हति, समिधꣳ सोम्याहरोपत्वा नेष्ये न सत्यादगा इति । तमुपनीय कृशानामबलानां चतुःशता गा निराकृत्योवाचेमाः सोम्यानुसंव्रजेति, ता अभिप्रस्थापयन्नुवाच—नासहस्रेणावर्त्तयेति; स ह वर्षगणं प्रोवास ता यदा सहस्रꣳ सम्पेदुः ॥ ३०५ ॥ ५ ॥

इति चतुर्थः खण्डः ॥ ४ ॥

पञ्चमः खण्डः

अथ हैनमृषभोऽभ्युवाद—सत्यकाम ३ इति, भगव इति ह प्रतिशुश्राव, प्राप्ताः सोम्य, सहस्रꣳस्मः, प्रापय न आचार्य्यकुलम् ॥ ३०६ ॥ १ ॥ ब्रह्मणश्च ते पादं ब्रवाणीति, ब्रवीतु मे भगवानिति, तस्मै होवाच—प्राची दिक्कला प्रतीची दिक्कला दक्षिणा दिक्कलोदीची दिक्कलैष वै सोम्य, चतुष्कलः पादो ब्रह्मणः प्रकाश-

वान् नाम ॥ ३०७ ॥ २ ॥ स य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते, प्रकाशवानस्मिँल्लोके भवति प्रकाशवतो ह लोकाञ्जयति, य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते ॥ ३०८ ॥ ३ ॥

इति पञ्चमः खण्डः ।

षष्ठः खण्डः ।

अग्निष्टे पादं वक्तेति । स ह श्वोभूते गा अभिप्रस्थापयाञ्चकार ता यत्राभि सायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश ॥ ३०९ ॥ १ ॥ तमग्निरभ्युवाद सत्यकाम ३ इति; भगव इति ह प्रतिशुश्राव ॥ ३१० ॥ २ ॥ ब्रह्मणः सोम्य, ते पादं ब्रवाणीति, ब्रवीतु मे भगवानिति; तस्मै होवाच पृथिवी कलान्तरिक्षं कला, द्यौः कला, समुद्रः कलैष वै सोम्य, चतुष्कलःपादो ब्रह्मणोऽनन्तवान् नाम ॥ ३११ ॥ ३ ॥ स य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणोऽनन्तवानित्युपास्तेऽनन्तवानस्मिँल्लोके भवत्यनन्तवतो ह लोकाञ्जयति, य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणोऽनन्तवानित्युपास्ते ॥ ३१२ ॥ ४ ॥

इति षष्ठः खण्डः ॥ ६ ॥

सप्तमः खण्डः ।

हꣳसस्ते पादं वक्तेति, स ह श्वोभूते गा अभिप्रस्थापयाञ्चकार, ता यत्राभि सायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश ॥ ३१३ ॥ १ ॥ तꣳहꣳ

स उपनिपत्याभ्युवाद—सत्यकाम ३ इति, भगव: इति ह प्रति-शुश्राव ॥ ३१४ ॥ २ ॥ ब्रह्मणः सोम्य, ते पाद ब्रवाणीति, ब्रवोतु मे भगवानिति, तस्मै होवाचाग्निः कला सूर्य्यः कला चन्द्रः कला विद्युत् कलैष वै सोम्य; चतुष्कलः पादो ब्रह्मणो ज्योतिष्मान्नाम ॥ ३१५ ॥ ३ ॥ स य एतमेवं विद्वाᳪश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपास्ते, ज्योतिष्मानस्मिल्लोंके भवति, ज्योतिष्मतो ह लोकाञ्जयति, य एतमेवं विद्वाᳪश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपास्ते ॥ ३१६ ॥ ४ ॥

इति सप्तमः खण्डः ॥ ७ ॥

अष्टमः खण्डः ।

मद्गुष्टे पादं वक्तेति, स ह श्वोभूते गा अभिप्रस्थापयाञ्चकार, ता यत्राभि सायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङ् पोपविवेश ॥ ३१७ ॥ १ ॥ तं मद्गुरुपनिपत्याभ्युवाद—सत्यकाम ३ इति, भगव, इति ह प्रति-शुश्राव ॥ ३१८ ॥ २ ॥ ब्रह्मणः सोम्य, ते पादं ब्रवाणीति, ब्रवीतु मे भगवानिति, तस्मै होवाच—प्राणः कला चक्षुः कला श्रोत्रं कला मनः कलैष वै सौम्य, चतुष्कलः पादो ब्रह्मण आयतनवान्नाम ॥ ३१८ ॥ ३ ॥ स य एतमेवं पादं ब्रह्मण आयतनवानित्युपास्त आयतनवानस्मिल्लोंके भवत्यायतनवतो ह लोकाञ्जयति, य एतमेवं विद्वाᳪश्चतुष्कलं पादं ब्रह्मण आयतनवानित्युपास्ते ॥ ३१९ ॥ ४ ॥

इति अष्टमः खण्डः ॥ ८ ॥

नवमः खण्डः ।

प्राप हाचार्य्यकुलं, तमाचार्य्योऽभ्युवाद सत्यकाम ३ इति; भगव इति ह प्रतिशुश्राव ॥ ३२० ॥ १ ॥ ब्रह्मविदिव वै सोम्य भासि; को त्वानुशशासेत्यन्ये मनुष्येभ्य इति ह प्रतिजज्ञे; भगवाꣳस्त्वेव मे कामे ब्रूयात् ॥ ३२१ ॥ २ ॥ श्रुतꣳ ह्येव मे भगवद्दृशेभ्य आचार्य्याद्धैव विद्या विदिता साधिष्ठं प्रापयतीति तस्मै हैतदेवोवाचात्र ह न किञ्चन वीयायेति वीयायेति ॥ ३२२ ॥ ३ ॥

इति नवमः खण्डः ॥ ९ ॥

दशमः खण्डः

उपकोसलो ह वै कामलायनः सत्यकामे जाबाले ब्रह्मचर्य्यमुवास, तस्य ह द्वादशवर्षाण्यग्नीन् परिचचार स ह स्मान्यानन्तेवासिनः समावर्त्तयꣳस्तꣳ ह स्मैव न समावर्त्तयति ॥ ३२३ ॥ १ ॥ तं जायोवाच—तप्तो ब्रह्मचारी कुशलमग्नीन् परिचचारीन्मा त्वाग्नयः परिप्रवोचन, प्रब्रूह्यस्मा इति; तस्मै हाप्रोच्यैव प्रवासाञ्चक्रे ॥ ३२४ ॥ २ ॥ स ह व्याधिनानशितुं दध्रे, तमाचार्य्यजायोवाच-ब्रह्मचारिन्नशान किं नु नाश्नासीति, स होवाच बहव इमेऽस्मिन् पुरुषे कामा नानात्यया व्याधिभिः प्रतिपूर्णोऽस्मि, नाशिष्यामीति ॥ ३२५ ॥ ३ ॥ अथ हाग्नयः समुदिरे—तप्तो ब्रह्मचारी कुशलं नः पर्य्यचारीत्, हन्तास्मै प्रब्रवामेति तस्मै होचुः ब्रह्म कं ब्रह्म खं ब्रह्मेति ॥ ३२६ ॥ ४ ॥ स होवाच विजानाम्यहं यत्प्राणो ब्रह्म, कञ्च तु

खञ्च न विजानामीति । ते होचुर्यद्वाव कं तदेव खं यदेव खं तदेव कमिति प्राणञ्च हास्मै तदाकाशञ्चोचु: ॥ ३२७ ॥ ५

इति दशमः खण्डः ॥ १०

एकादशः खण्डः ।

अथ हैनं गार्हपत्योऽनुशशास पृथिव्यग्निरन्नमादित्य इति; य एष आदित्ये पुरुषो दृश्यते, सोऽहमस्मि स एवाहमस्मीति ॥३२८ ॥ १॥ स य एतमेवं विद्वानुपास्तेऽपहते पापकृत्यां लोकी भवति सर्वमायुरेति ज्योग्जीवति नास्यावर पुरुषाः क्षीयन्त उप वयं तं भुञ्जामोऽस्मिꣳश्च लोकेऽमुष्मिꣳश्च, य एतमेवं विद्वानुपास्ते ॥ ३२९ ॥ २॥

इति एकादशः खण्डः ॥ ११ ॥

द्वादशः खण्डः ।

अथ हैनमन्वाहार्य्य पचनोऽनुशशासापो दिशो नक्षत्राणि चन्द्रमा इति । य एष चन्द्रमसि पुरुषो दृश्यते, सोऽहमस्मि स एवाहमस्मीति ॥ ३३० ॥ १ ॥ स य एतमेवं विद्वानुपास्तेऽपहते पापकृत्यां लोकी भवति सर्वमायुरेति ज्योग्जीवति नास्यावर पुरुषाः क्षीयन्त उप वयं तं भुञ्जामोऽस्मिꣳश्च लोकेऽमुष्मिꣳश्च, य एतमेवं विद्वानुपास्ते ॥ ३३१ ॥ २ ॥

इति द्वादशः खण्डः ॥ १२ ॥

त्रयोदशः खण्डः ।

अथ हैनमाहवनीयोऽनुशशास प्राण आकाशो द्यौर्विद्युदिति । य एष विद्युति पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति ॥ ३३३ ॥ १ ॥ स य एतमेवं विद्वानुपास्तेऽपहते पापकृत्यां लोकी भवति सर्वमायुरेति ज्योग् जीवति नास्यावर पुरुषाः क्षीयन्ते, उप वयं तं भुञ्जामोऽस्मिꣳश्च लोकेऽमुष्मिꣳश्च; य एतमेवं विद्वानुपास्ते ॥ ३३३ ॥ २ ॥

इति त्रयोदशः खण्डः ॥ १३ ॥

चतुर्दशः खण्डः ।

ते होचुरुपकोसलैषा सोम्य, तेऽस्मद्विद्यात्मविद्या चाचार्य्यस्तु ते गतिं वक्तेति; आजगाम हास्याचार्य्यस्तमाचार्य्योऽभ्युवादोपकोसल ३ इति ॥ ३३४ ॥ १ ॥ भगव इति ह प्रतिशुश्राव, ब्रह्मविद इव सोम्य ते मुखं भाति, को नु त्वानुशशासेति । को नु मानुशिष्याद्भो इतीहापेव निह्नुत, इमे नूनमीदृशा अन्यादृशा इतीहाग्नीनभ्यूदे, किं नु सोम्य किल तेऽवोचन्निति ॥ ३३५ ॥ २ ॥ इदमिति ह प्रतिजज्ञे, लोकान् वाव किल सोम्य, तेऽवोचन्नहन्तु ते तद्वक्ष्यामि—यथा पुष्करपलाश आपो न श्लिष्यन्ते, एवमेवं विदि पापं कर्म्म न श्लिष्यत इति; ब्रवीतु मे भगवानिति तस्मै होवाच ॥ ३३६ ॥ ३ ॥

इति चतुर्दशः खण्डः ॥ १४ ॥

पञ्चदशः खण्डः ।

य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्मेति । तद्यद्यप्यस्मिन् सर्पिर्वोदकं वा सिञ्चति, वर्त्मनी एव गच्छति ॥ ३३७ ॥ १ ॥ एत ँ संयद्वाम इत्याचक्षत एत ँ हि सर्वाणि वामान्यभिसंयन्ति; सर्वाण्येनं वामान्यभिसंयन्ति य एवंवेद ॥ ३३८ ॥२ ॥ एष उ वामनीरेष हि सर्वाणि वामानि नयति; सर्वाणि वामानि नयति य एवं वेद ॥ ३३९ ॥ ३ ॥ एष उ एव भामनीरेष हि सर्वेषु लोकेषु भाति; सर्वेषु लोकेषु भाति य एवं वेद ॥ ३४० ॥ ४ ॥ अथ यदु चैवास्मिञ्छव्यं कुर्वन्ति यदि च न अर्चिषमेवाभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद् यान् षडुदङ्ङेति मासा ँ स्तान्मासेभ्यः संवत्सर ँ संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत् पुरुषोऽमानवः स एनान् ब्रह्म गमयति; एष देवपथो ब्रह्मपथः, एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्त्तन्ते नावर्त्तन्ते ॥ ३४१ ॥ ५ ॥

इति पञ्चदशः खण्डः ॥ १५ ॥

षोडशः खंडः ।

एष ह वै यज्ञो योऽयं पवते एषः ह यन्निद ँ सर्वं पुनाति; यदेष यन्निद ँ सर्वं पुनाति, तस्मादेष एव यज्ञस्तस्य वाक् च मनश्च वर्त्तनी ॥ ३४२ ॥ १ ॥ तयोरन्यतरां मनसा स ँ स्करोति ब्रह्मा वाचा होताध्वर्युरुद्गातान्यतरा ँ स यत्रोपाकृते प्रातरनुवाके पुरा परिधानीयाया ब्रह्म व्यवदति ॥ ३४३ ॥ २ ॥ अन्यतरामेव वर्त्तन

ꣳ सꣳस्करोति हीयतेऽन्यतरा; स यथैकपाद् व्रजन् रथो वैकेन चक्रेण वर्त्तमानो रिष्यत्येवमस्य यज्ञो रिष्यति; यज्ञꣳ रिष्यन्तं यजमानोऽनुरिष्यति; स इष्ट्वा पापीयान् भवति ॥ ३४४ ॥ ३ ॥ अथ यत्रोपाकृते प्रातरनुवाके न पुरा परिधानीयाया ब्रह्मा व्यवदत्युभे एव वर्त्तनी सꣳस्कुर्वन्ति न हीयतेऽन्यतरा ॥ ३४५ ॥ ४ ॥ स यथोभयपाद्व्रजन् रथो वोभाभ्यां चक्राभ्यां वर्त्तमानः प्रतितिष्ठत्येवमस्य यज्ञः प्रतितिष्ठति; यज्ञं प्रतितिष्ठन्तं यजमानोऽनु प्रतितिष्ठति; स इष्ट्वा श्रेयान् भवति ॥ ३४६ ॥ ५ ॥

इति षोड़शः खण्डः ॥ १६

सप्तदशः खण्डः ।

प्रजापतिर्लोकानभ्यतपत्तेषां तप्यमानानाꣳ रसान् प्रावृहदग्निं पृथिव्या वायुमन्तरीक्षादादित्यं दिवः ॥ ३४७ ॥ १ ॥ स एतास्तिस्रो देवता अभ्यतपत्, तासां तप्यमानानाꣳ रसान् प्रावृहदग्नेर्ऋचो वायोर्यजूꣳषि सामान्यादित्यात् ॥ ३४८ ॥ २ ॥ स एतां त्रयीं विद्यामभ्यतपत् तस्यास्तप्यमानाया रसान् प्रावृहद्भूरित्यृग्भ्यो भुवरिति यजूर्भ्यः स्वरिति सामभ्यः ॥ ३४९ ॥ ३ ॥ तद्यदृक्तो रिष्येद् भूः स्वाहेति गार्हपत्ये जुहुयादृचामेव तद्रसेनर्चां वीर्येणर्चां यज्ञस्य विरिष्टꣳ सन्दधाति ॥३५०॥४॥ अथ यदि यजुष्टो रिष्येद् भुवः स्वाहेति दक्षिणाग्नौ जुहुयात्। यजुषामेव तद्रसेन यजुषां वीर्य्येण यजुषां यज्ञस्य विरिष्टꣳसन्दधाति ॥ ३५१ ॥ ५ ॥ अथ यदि सामतो रिष्येत् स्वः स्वाहेत्याहवनीये जुहुयात्, साम्नामेव

तद्रसेन साम्नां वीर्य्येण साम्नां यज्ञस्य विरिष्टꣳ सन्दधाति ॥ ३५२ ॥ ६ ॥ तद्यथा लवणेन सुवर्णꣳ सन्दध्यात् सुवर्णेन रजतꣳ रजतेन त्रपु, त्रपुणा सीसꣳ सीसेन लोहं लोहेन दारु, दारु चर्म्मणा ॥ ३५३ ॥ ७ ॥ एवमेषां लोकानामासां देवतानामस्यास्त्रय्या विद्याया वीर्य्येण यज्ञस्य विरिष्टꣳ सन्दधाति भेषजकृतो ह वा एष यज्ञो यत्रैवंविद् ब्रह्मा भवति ॥ ३५४ ॥ ८ ॥ एष ह वा उदक् प्रवणो यज्ञो यत्रैवंविद् ब्रह्मा भवत्येवंविदꣳ ह वा एषा ब्रह्माणमनुगाथा यतो यत आवर्त्तते तत्तद्गच्छति ॥ ३५५ ॥ ९ ॥ मानवो ब्रह्मैवैक ऋत्विक् कुरूनश्वाभिरक्षत्येवंविद्ध वै ब्रह्मा यज्ञं यजमानꣳ सर्वाꣳ ऋर्त्विजोऽभिरक्षति, तस्मादेवंविदमेव ब्रह्माणं कुर्वीत नानेवंविदं नानेवंविदम् ॥ ३५६ ॥ १० ॥

इति सप्तदशः खण्डः ॥ १० ॥

॥ इति चतुर्थोऽध्यायः ॥

पञ्चमोऽध्यायः ।

प्रथमः खण्डः ।

यो ह वै ज्येष्ठञ्च श्रेष्ठञ्च वेद, ज्येष्ठश्च ह वै श्रेष्ठश्च भवति। प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च ॥ ३५७ ॥ १ ॥ यो ह वै वसिष्ठं वेद, वसिष्ठो ह स्वानां भवति। वाग् वाव वसिष्ठः ॥ ३५८ ॥ २। यो ह वै प्रतिष्ठां वेद, प्रति ह तिष्ठत्यस्मिꣳ श्च लोकेऽमुष्मिꣳ श्च, चक्षुर्वाव प्रतिष्ठा ॥ ३५९ ॥ ३ ॥ यो ह वै सम्पदं वेद, स ꣳ हास्मै कामाः पद्यन्ते दैवाश्च मानुषाश्च, श्रोत्रं वाव सम्पत् ॥ ३६० ॥ ४ ॥ यो ह वा आयतनं वेदायतनꣳ ह स्वानां भवति, मनो ह वा आयतनम् ॥ ३६१ ॥ ५ ॥ अथ ह प्राणा अहꣳ श्रेयसि व्यूदिरेऽहꣳश्रेया-नस्म्यहꣳ श्रेयानस्मीति ॥ ३६२ ॥ ६ ॥ ते ह प्राणाः प्रजापतिं पितरमेत्योचुर्भगवन् को नः श्रेष्ठ इति। तान् होवाच – यस्मिन् व उत्क्रान्ते शरीरं पापिष्ठतरमिव दृश्येत, स वः श्रेष्ठ इति॥ ३६३ ॥ ७॥ सा ह वागुच्चक्राम, स संवत्सरं प्रोष्य पर्येत्योवाच—कथमशकतर्ते मज्जीवितुमिति। यथा कला अवदन्तः प्राणन्तः प्राणेन पश्यन्तश्च-क्षुषा शृण्वन्तः श्रोत्रेण ध्यायन्तो मनसैवमिति ; प्रविवेश ह वाक् ॥ ३६४ ॥ ८ ॥ चक्षुर्होच्चक्राम, तत् संवत्सरं प्रोष्य पर्य्येत्योवाच कथमशकतर्ते मज्जीवितुमिति। यथाऽन्धा अपश्यन्तः प्राणन्त प्राणेन वदन्तो वाचा शृण्वन्तः श्रोत्रेण ध्यायन्तो मनसैवमिति

प्रविवेश ह चक्षुः ॥ ३६५ ॥ ९ ॥ श्रोत्र ँ होच्चक्राम; तत् संवत्सरं प्रोष्य पर्य्येत्योवाच 'कथमशकतर्त्ते मज्जीवितुमिति । यथा बाधरा अशृण्वन्तः प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा ध्यायन्तो मनसैवमिति; प्रविवेश ह श्रोत्रम् ॥ ३६६ ॥ १० ॥ मनो होच्चक्राम, तत् संवत्सरं प्रोष्य पर्य्येत्योवाच कथमशकतर्त्ते मज्जीवितुमिति । यथा बाला अमनसः प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेणैवमिति ; प्रविवेश ह मनः ॥ ३६७ ॥ ११ ॥ अथ ह प्राण उच्चिक्रमिषन् स यथा सुहयः पड्वीश-शङ्कून् सङ्खिदेत् एवमितरान् प्राणान् समखिदत् त ँ हाभिसमेत्योचुर्भगवन्नेधि, त्वं नः श्रेष्ठोऽसि, मोत्क्रमीरिति ॥ ३६८ ॥ १२ ॥ अथ हैनं वागुवाच—यदहं वसिष्ठोऽस्मि, त्वं तद्वसिष्ठोऽसीति । अथ हैनं चक्षुरुवाच—यदहं प्रतिष्ठास्मि, त्वं तत्प्रतिष्ठासीति ॥ ३६९ ॥१३ । अथ हैन ँ श्रोत्रमुवाच—यदह ँ सम्पदस्मि, त्वं तत्सम्पदसीति । अथ हैनं मन उवाच—यदहमायतनमस्मि, त्वं तदायतनमसीति ॥ ३७० ॥ १४ ॥ न वै वाचो न चक्षू ँ षि न श्रोत्राणि न मना ँ सीत्याचक्षते, प्राणा इत्येवाचक्षते, प्राणो ह्येवैतानि सर्वाणि भवति ॥ ३७१ ॥ १५ ॥

इति प्रथमः खण्डः ॥ १ ॥

द्वितीयः खण्डः ।

स होवाच किं मेऽन्नं भविष्यतीति, यत्किञ्चिदिदम् आ श्वभ्य

आ शकुनिभ्य इति होचुः। तद्वा एतदनस्य नमनो ह वै नाम प्रत्यक्षम्, न ह वा एवं विदि किञ्चनानन्नं भवतीति ॥ ३७२ ॥ १ ॥ स होवाच किं मे वासो भविष्यतीत्याप इति होचुः, तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति, लम्भुको ह वासो भवत्यनग्नो ह भवति ॥ ३७३ ॥ २ ॥ तद्धैतत् सत्यकामो जाबालो गोश्रुतये वैयाघ्रपद्यायोक्त्वोवाच यद्यप्येनच्छुष्काय स्थाणवे ब्रूयाज्जायेरन्नेवास्मिञ्छाखाः प्ररोहेयुः पलाशानीति ॥ ३७४ ॥ ३ ॥ अथ यदि महज्जिगमिषेदमावास्यायां दीक्षित्वा पौर्णमास्याᳬ रात्रौ सर्वौषधस्य मन्थं दधिमधुनोरुपमथ्य ज्येष्ठाय श्रेष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेत् ॥ ३७५ ॥ ४ ॥ वसिष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेत्, प्रतिष्ठायै स्वाहेत्योग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेत्, सम्पदे स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेत्, आयतनाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे सम्पातमवनयेत् ॥ ३७६ ॥ ५ ॥ अथ प्रतिसृप्याञ्जलौ मन्थमाधाय जपत्यमो नामास्यमा हि ते सर्वमिदᳬ स हि ज्येष्ठः श्रेष्ठो राजाधिपतिः, स मा ज्यैष्ठ्यᳬ श्रैष्ठ्यᳬ राज्यमाधिपत्यं गमयत्वहमेवेदᳬ सर्वमसानीति ॥ ३७७ ॥ ६ ॥ अथ खल्वेतयर्चा पच्छ आचामति—तत् सवितुर्वृणीमह इत्याचामति वयं देवस्य भोजनमित्याचामति, श्रेष्ठᳬ सर्वधातममित्याचामति, तुरं भगस्य धीमहीति सर्वं पिबति, निर्णिज्य कᳬसं चमसं वा पश्चादग्नेः संविशति चर्म्मणि वा स्थण्डिले वा वाचंयमोऽप्रसाहः, स यदि स्त्रियं पश्येत् समृद्धं कर्म्मेति विद्यात् ॥ ३७८ ॥ ७ ॥

तदेष श्लोकः—

यदा कर्म्मसु काम्येषु स्त्रियꣳ स्वप्नेषु पश्यति ।
समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने
तस्मिन् स्वप्ननिदर्शने ॥ ३७९ ॥ ८

इति द्वितीयः खण्डः । २

तृतीयः खण्डः ।

श्वेतकेतुर्हारुणेयः पञ्चालानाꣳ समितिमेयाय; तꣳ ह प्रवाहणो जैवलिरुवाच—कुमारानु त्वाशिषत् पितेति, अनु हि भगव इति ॥ ३८० ॥ १ ॥ वेत्थ यदितोऽधि प्रजाः प्रयन्तीति ? न भगव इति । वेत्थ यथा पुनरावर्त्तन्त ३ इति ? न भगव इति । वेत्थ पथोर्देवयानस्य पितृयाणस्य च व्यावर्त्तना ३ इति ? न भगव इति ॥ ३८१ ॥ २ ॥ वेत्थ यथासौ लोको न सम्पूर्य्यत ३ इति ? न भगव इति वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति ? नैव भगव इति ॥ ३८२ ॥ ३ ॥ अथानु किमनुशिष्टोऽवोचथाः, यो हीमानि न विद्यात् कथꣳ सोऽनुशिष्टो ब्रवीतेति । स हायस्तः पितुरर्द्धमेयाय, तꣳ होवाचाननुशिष्य वाव किल मा भगवानब्रवीदनु त्वाशिषमिति ॥ ३८३ ॥ ४ ॥ पञ्च मा राजन्यबन्धुः प्रश्नान प्राक्षीत्; तेषां नैकञ्च नाशकं विवक्तुमिति । स होवाच यथा मा त्वं तदैतानवदो यथाहमेषां नैकञ्चन वेद; यद्यहमिमान वेदिष्यं कथं ते नावक्ष्यमिति ॥ ३८४ ॥ ५ ॥ स ह गौतमो राज्ञोऽर्द्धमेयाय, तस्मै ह प्राप्तायार्हाञ्चकार, स ह प्रातः-

समाग उद्देयाय, तᳫ होवाच मानुषस्य भगवन् गौतम वित्तस्य वरं वृणीथा इति । स होवाच तवैव राजन् मानुषं वित्तम्, यामेव कुमारस्यान्ते वाचमभाषथास्तामेव मे ब्रूहीति । स ह कृच्छ्री बभूव । ३८५ ॥ ६ ॥ त ᳫ ह चिरं वसेत्याज्ञापयाञ्चकार; तᳫ होवाच यथा मा त्वं गौतमावदो यथेयं न प्राक् त्वत्तः पुरा विद्या ब्राह्मणान् गच्छति; तस्मादु सर्वेषु क्षत्रस्यैव प्रशासनमभूदिति; तस्मै होवाच ॥ ३८६ ॥ ७ ॥

इति तृतीयः खण्डः । ३

चतुर्थः खण्डः ।

असौ वाव लोको गौतमाग्निस्तस्यादित्य एव समिद् रश्मयो धूमोऽहरर्चिश्चन्द्रमा अङ्गारा नक्षत्राणि विस्फुलिङ्गाः ॥ ३८७ ॥ १ ॥ तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति, तस्या आहुतेः सोमो राजा सम्भवति ॥ ३८८ ॥ २ ॥

इति चतुर्थः खण्डः । ४

पञ्चमः खण्डः ।

पर्जन्यो वाव गौतमाग्निस्तस्य वायुरेव समिदभ्रं धूमो विद्युदर्चिरशनिरङ्गारा ह्रादनयो विस्फुलिङ्गाः ॥ ३८९ ॥ १ ॥ तस्मिन्नेतस्मिन्नग्नौ देवाः सोमᳫ राजानं जुह्वति, तस्या आहुतेर्वर्षᳫ सम्भवति ॥ ३९० ॥ २ ॥

इति पञ्चमः खण्डः । ५

षष्ठः खण्डः ।

पृथिवी वाव गौतमाग्निस्तस्याः संवत्सर एव समिदाकाशो धूमो रात्रिरर्चिर्दिशोऽङ्गारा अवान्तरदिशो विस्फुलिङ्गाः ॥ ३९१ । १ ॥ तस्मिन्नेतस्मिन्नग्नौ देवा वर्षं जुह्वति, तस्या आहुतेरन्न ᳪ सम्भवति ॥ ३९२ ॥ २

इति षष्ठः खण्डः । ६

सप्तमः खण्डः ।

पुरुषो वाव गौतमाग्निस्तस्य वागेव समित् प्राणो धूमो जिह्वार्चिश्चक्षुरङ्गाराः श्रोत्रं विस्फुलिङ्गाः ॥ ३९३ ॥ १ ॥ तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति, तस्या आहुतेरेतः सम्भवति ॥ ३९४ ॥ २

इति सप्तमः खण्डः । ७

अष्टमः खण्डः ।

योषा वाव गौतमाग्निस्तस्या उपस्थ एव समिद् यदुपमन्त्रयते स धूमो योनिरर्चिर्यदन्तः करोति तेऽङ्गारा अभिनन्दा विस्फुलिङ्गाः ॥ ३९५ ॥ १ ॥ तंस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति; तस्या आहुतेर्गर्भः सम्भवति ॥ ३९६ ॥ २ ॥

इति अष्टमः खण्डः ॥ ८ ॥

नवमः खण्डः ।

इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति, स उल्बा-

वृतो गर्भो दश वा नव वा मासानन्तः शयित्वा यावद्वाथ जायते ॥ ३९७ ॥ १ ॥ स जातो यावदायुषं जीवति, तं प्रेतं दिष्टमितोऽग्न-य एव हरन्ति, यत एवेतो यतः सम्भूतो भवति ॥ ३९८ ॥ २ ॥

इति नवमः खण्डः ॥ ९ ॥

दशमः खण्डः ।

तद्य इत्थं विदुः, ये चेमेऽरण्ये श्रद्धा तप इत्युपासते, तेऽर्चिष-मभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्य्यमाणपक्षमापूर्य्यमाणपक्षाद्यान् षड् दङ्ङेति मासाꣳस्तान् ॥ ३९९ ॥ १ ॥ मासेभ्यः संवत्सरꣳ संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमा-नवः स एनं ब्रह्म गमयत्येष देवयानः पन्था इति ॥ ४०० ॥ २ ॥ अथ य इमे ग्राम इष्टापूर्त्ते दत्तमित्युपासते, ते धूममभिसम्भवन्ति धूमाद्रात्रिꣳ रात्रेरपरपक्षमपरपक्षाद् यान् षड्दक्षिणैति मासाꣳस्तान् नैते संवत्सरमभिप्राप्नुवन्ति ॥ ४०१ ॥ ३ ॥ मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा तद्देवा-नामन्नं तं देवा भक्षयन्ति ॥ ४०२ ॥ ४ ॥ तस्मिन् यावत् सम्पातमु-षित्वाथैतमध्वानं पुनर्निवर्त्तन्ते यथेतमाकाशमाकाशाद्वायुं वायु-र्भूत्वा धूमो भवति धूमो भूत्वाभ्रं भवति ॥ ४०३ ॥ ५ ॥ अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधि वनस्पतयस्तिलमाषा इति जायन्ते, अतो वै खलु दुर्निष्प्रपतरम्, यो यो ह्यन्नमत्ति यो यो रेतः सिञ्चति तद्भूय एव भवति ॥४०४॥६॥ तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्म-णयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वाऽथ य इह कपूय चरणा

अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा शूकरयोनिं वा चण्डालयोनिं वा ॥ ४०५ ॥ ७ ॥ अथैतयोः पथोर्न कतरेण च न तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत्तृतीय ᳫ स्थानं, तेनासौ लोको न सम्पूर्यते, तस्माज्जुगुप्सेत । तदेष श्लोकः—॥ ४०६ ॥ ८ ॥ स्तेनो हिरण्यस्य सुरां पिब ᳫ श्च गुरोस्तल्पमावसन् ब्रह्महा चैते पतन्ति चत्वारः, पञ्चमश्चाचर ᳫ स्तैरिति ॥ ४०७ ॥ ९ ॥ अथ ह य एतानेवं पञ्चाग्नीन वेद, न सह तैरप्याचरन् पाप्मना लिप्यते, शुद्धः पूतः पुण्यलोको भवति, य एवं वेद य एवं वेद ॥ ४०८ ॥ १० ॥

इति दशमः खण्डः ॥ १० ॥

एकादशः खण्डः ।

प्राचीनशाल औपमन्यवः सत्ययज्ञः पौलुषिरिन्द्रद्युम्नो भाल्लवेयो जनः शार्कराक्ष्यो बुडिल आश्वतराश्विस्ते हैते महाशाला महाश्रोत्रियाः समेत्य मीमा ᳫ सां चक्रुः—को न आत्मा, किं ब्रह्मेति ॥४०९॥१॥ ते ह सम्पादयाञ्चक्रुरुद्दालको वै भगवन्तोऽयमारुणिः सम्प्रतीममात्मानं वैश्वानरमध्येति त ᳫ हन्ताभ्यागच्छामेति; त ᳫ हाभ्याजग्मुः ॥ ४१० ॥ २ ॥ स ह सम्पादयाञ्चकार प्रक्ष्यन्ति मामिमे महाशाला महाश्रोत्रियास्तेभ्यो न सर्वमिव प्रतिपत्स्ये हन्ताहमन्यमभ्यनुशासानीति ॥ ४११ ॥ ३ ॥ तान् होवाचाश्वपतिर्वै भगवन्तोऽयं कैकेयः सम्प्रतीममात्मानं वैश्वानरमध्येति त ᳫ हन्ताभ्यागच्छामेति त ᳫ हाभ्याजग्मुः ॥४१२॥ ४ ॥ तेभ्यो ह प्राप्तेभ्यः

पृथगर्हाणि कारयाञ्चकार; स ह प्रातः सञ्जिहान उवाच—न मे स्तेनो जनपदे न कदर्य्यो न मद्यपः । नानाहिताग्निर्नाविद्वान् न स्वैरी स्वैरिणी कुतः । यक्ष्यमाणो वै भगवन्तोऽहमस्मि; यावदेकैकस्मा ऋत्विजे धनं दास्यामि, तावद्भगवद्भ्यो दास्यामि, वसन्तु भगवन्त इति ॥४१३।५॥ ते होचुर्येन हैवार्थेनं पुरुषश्चरेत्त ँ हैव वदेत्, आत्मान मेवेमं वैश्वानर ँ सम्प्रत्यध्येषि तमेव नो ब्रूहीति ॥ ४१४ ॥ ६ ॥ तान् होवाच प्रातर्वः प्रतिवक्तास्मीति; ते ह समित्पाणयः पूर्वाह्णे प्रतिचक्रमिरे; तान् हानुपानीयैवैतदुवाच ॥ ४१५ ॥ ७ ॥

इति एकादशः खण्डः ॥ ११ ॥

द्वादशः खण्डः ।

औपमन्यव कं त्वमात्मानमुपास्से इति; दिवमेव भगवो राजन्निति होवाचैष वै सुतेजो आत्मा वैश्वानरो यं त्वमात्मानमुपास्से, तस्मात्तव सुतं प्रसुतमासुतं कुले दृश्यते ॥ ४१६ ॥ १ ॥ अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते मूर्द्धात्वेष आत्मन इति होवाच, मूर्द्धा ते व्यपतिष्यद् यन्मां नागमिष्य इति ॥ ४१७ ॥ २ ॥

इति द्वादशः खण्डः ॥ १२ ॥

त्रयोदशः खण्डः ॥

अथ होवाच सत्ययज्ञं पौलुषिं—प्राचीनयोग्य कं त्वमात्मानमुपास्स इति । आदित्यमेव भगवो राजन्निति होवाचैष वै विश्वरूप

आत्मा वैश्वानरो यं त्वमात्मानमुपास्से; तस्मात्तव बहु विश्वरूपं कुले दृश्यते ॥ ४१८ ॥ १ ॥ प्रवृत्तोऽश्वतरीरथो दासीनिष्कोऽत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले, य एतमेवात्मानं वैश्वानरमुपास्ते, चक्षुष्ट्वेतदात्मन इति होवाचान्धोऽभविष्यो यन्मां नागमिष्य इति ॥ ४१९ ॥ २

इति त्रयोदशः खण्डः ॥ १३ ॥

चतुर्दशः खण्डः ।

अथ होवाचेन्द्रद्युम्नं भाल्लवेयम्—वैयाघ्रपद्य, कं त्वमात्मानमुपास्स इति । वायुमेव भगवो राजन्निति होवाचैष वै पृथग्वर्त्मात्मा वैश्वानरो यं त्वमात्मानमुपास्से ; तस्मात् त्वां पृथग् बलय आयन्ति पृथग्-रथश्रेण्योऽनुयन्ति ॥ ४२० ॥ १ ॥ अत्स्यन्नं पश्यसि प्रियमत्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले, य एतमेवमात्मानं वैश्वानरमुपास्ते, प्राणस्त्वेष आत्मन इति होवाच, प्राणस्त उदक्रमिष्यद् यन्मां नागमिष्य इति ॥ ४२१ ॥ २ ॥

इति चतुर्दशः खण्डः ॥ १४ ॥

पञ्चदशः खण्डः ।

अथ होवाच जनꣳ शार्कराक्ष्य; कं त्वमात्मानमुपास्स इत्याकाशमेव भगवो राजन्निति होवाचैष वै बहुल आत्मा वैश्वानरो यं त्वमात्मानमुपास्से, तस्मात्त्वं बहुलोऽसि प्रजया च धनेन च ॥ ४२२ ॥१॥ अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य

ब्रह्मवर्चसं कुले, य एतमेवमात्मानं वैश्वानरमुपास्ते, संदेहस्त्वेष आत्मन इति होवाच, संदेहस्ते व्यशीर्य्यद् यन्मां नागमिष्य इति ॥ ४२३ ॥ २ ॥

इति पञ्चदशः खण्डः ॥ १५ ॥

षोडशः खण्डः ।

अथ होवाच बुडिलमाश्वतराश्विम्, वैयाघ्रपद्य कं त्वमात्मानमुपास्से इत्यप एव भगवो राजन्निति होवाचैष वै रयिरात्मा वैश्वानरो यं त्वमात्मानमुपास्से, तस्मात्त्वꣳरयिमान् पुष्टिमानसि ॥ ४२४ ॥ १ ॥ अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले, य एतमेवमात्मानं वैश्वानरमुपास्ते । वस्तिस्त्वेष आत्मन इति होवाच । वस्तिस्ते व्यभेत्स्यद् यन्मां नागमिष्य इति ॥ ४२५ ॥ २ ॥

इति षोडशः खण्डः ॥ १६ ॥

सप्तदशः खण्डः ।

अथ होवाचोद्दालकमारुणिम्, गौतम कं त्वमात्मानमुपास्स इति, पृथिवीमेव भगवो राजन्निति होवाच । एष वै प्रतिष्ठात्मा वैश्वानरो यं त्वमात्मानमुपास्से, तस्मात्त्वं प्रतिष्ठितोऽसि प्रजया च पशुभिश्च ॥ ४२६ ॥ १ ॥ अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले, य एतमेवमात्मानं वैश्वानरमुपास्ते, पादौ त्वेतावात्मन इति होवाच, पादौ ते व्यम्लास्येतां यन्मां नागमिष्य इति ॥ ४२७ ॥ २ ॥

इति सप्तदशः खण्डः ॥ १७ ॥

अष्टादशः खण्डः ।

तान् होवाचैते वै खलु यूयं पृथगिवेममात्मानं वैश्वानरं विद्वा-ꣳसोऽन्नमत्थ, यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वा-नरमुपास्ते, स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति ॥ ४२८ ॥ १ ॥ तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजा-श्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा सन्देहो बहुलो वस्तिरेव रयिः पृथिव्येव पादौ उर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वा-हार्य्यपचन आस्यमाहवनीयः ॥ ४२९ ॥ २ ॥

इति अष्टादशः खण्डः ॥ १८ ॥

ऊनविंशः खण्डः ।

तद् यद्भक्तं प्रथममागच्छेत्तद्धोमीयꣳस यां प्रथमामाहुतिं जुहु-यात्, तां जुहुयात् प्राणाय स्वाहेति, प्राणस्तृप्यति ॥४३०॥ १॥ प्राणे तृप्यति चक्षुस्तृप्यति चक्षुषि तृप्यत्यादित्यस्तृप्यत्यादित्ये तृप्यति द्यौस्तृ-प्यति दिवि तृप्यन्त्यां यत्किञ्च द्यौश्चादित्यश्चाधितिष्ठतस्तत् तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसे-सेनेति ॥ ४३१ ॥ २

इति ऊनविंशः खण्डः । १९

विंशः खण्डः ।

अथ यां द्वितीयां जुहुयात्तां जुहुयाद् व्यानाय स्वाहेति, व्यान-स्तृप्यति ॥ ४३२ ॥ १ ॥ व्याने तृप्यति, श्रोत्रं तृप्यति, श्रोत्रे,

तृप्यति चन्द्रमास्तृप्यति, चन्द्रमसि तृप्यति दिशस्तृप्यन्ति, दिक्षु तृप्यन्तीषु यत्किञ्च दिशश्च चन्द्रमाश्चाधितिष्ठन्ति, तत्तृप्यति, तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥ ४३३ ॥ २

इति विंशः खण्डः ॥ २० ॥

एकविंशः खण्डः ।

अथ यां तृतीयां जुहुयात तां जुहुयादपानाय स्वाहेत्यपानस्तृप्यति ॥ ४३४ ॥ १ ॥ अपाने तृप्यति वाक् तृप्यति वाचि तृप्यन्त्यामग्निस्तृप्यत्यग्नौ तृप्यति पृथिवी तृप्यति पृथिव्यां तृप्यन्त्यां यत्किञ्च पृथिवी चाग्निश्चाधितिष्ठतस्तत् तृप्यति, तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥ ४३५ ॥ २

इति एकविंशः खण्डः ॥ २१ ॥

द्वाविंशः खण्डः ॥

अथ यां चतुर्थीं जुहुयात्तां जुहुयात् समानाय स्वाहेति समानस्तृप्यति ॥ ४३६ ॥ १ ॥ समाने तृप्यति मनस्तृप्यति मनसि तृप्यति पर्ज्जन्यस्तृप्यति पर्ज्जन्ये तृप्यति विद्युत् तृप्यति विद्युति तृप्यन्त्यां यत्किञ्च विद्युच्च पर्ज्जन्यश्चाधितिष्ठतस्तत् तृप्यति, तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥४३७॥२

इति द्वाविंशः खण्डः ॥ २२ ॥

त्रयोविंशः खण्डः ।

अथ यां पञ्चमीं जुहुयात्तां जुहुयादुदानाय स्वाहेत्युदानस्तृप्यति ॥ ४३८ ॥ १ ॥ उदाने तृप्यति त्वक् तृप्यति त्वचि तृप्यन्त्यां वायुस्तृप्यति वायौ तृप्यत्याकाशस्तृप्यत्याकाशे तृप्यति यत्किञ्च वायुश्चाकाशश्चाधितिष्ठतस्तत् तृप्यति, तस्यानुतृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥ ४३९ ॥ २

त्रयोविंशः खण्डः । २३

चतुर्विंशः खण्डः ।

स य इदमविद्वानग्निहोत्रं जुहोति यथाङ्गारानपोह्य भस्मनि जुहुयात् तादृक् तत् स्यात् ॥ ४४० ॥ १ ॥ अथ य एतदेवं विद्वानग्निहोत्रं जुहोति, तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेषु चात्मसु हुतं भवति ॥ ४४१ ॥ २ ॥ तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवꣳ हास्य सर्वे पाप्मानः प्रदूयन्ते, य एतदेवं विद्वानग्निहोत्रं जुहोति ॥ ४४२ ॥ ३ ॥ तस्मादु हैवंविद् यद्यपि चण्डालायोच्छिष्टं प्रयच्छेदात्मनि हैवास्य तद्वैश्वानरे हुतꣳ स्यादिति । तदेषः श्लोकः ॥ ४४३ ॥ ४ ॥ यथेह क्षुधिता बाला मातरं पर्युपासत एवꣳ सर्वाणि भूतान्यग्निहोत्रमुपासत इत्यग्निहोत्रमुपासत इति ॥४४४॥५

इति चतुर्विंशः खण्डः ॥ २४

॥ इति पंचमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः ।

—*०*—

प्रथमः खण्डः ।

श्वेतकेतुर्हारुणेय आस, त ँ ह पितोवाच श्वेतकेतो; वस ब्रह्मचर्यं न वै सोम्यास्मत् कुलीनोऽननूच्य ब्रह्मबन्धुरिव भवतीति ॥ ४४५ ॥ १ ॥ स ह द्वादशवर्ष उपेत्य चतुर्विँ ँ शतिवर्षः सर्वान् वेदानधीत्य महामना अनूचानमानी स्तब्ध एयाय त ँ ह पितोवाच श्वेतकेतो यन्नु सोम्येदं महामना अनूचानमानो स्तब्धोऽस्युत तमादेशमप्राक्ष्यः ॥ ४४६ ॥ २ ॥ येनाश्रुत ँ श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति कथं नु भगवः स आदेशो भवतीति ॥ ४४७ ॥ ३ ॥ यथा सोम्यैकेन मृत् पिण्डेन सर्वं मृन्मयं विज्ञात ँ स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ॥ ४४८ ॥ ४ ॥ यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञात ँ स्याद्वाचारम्भणं विकारो नामधेयं लोहमित्येव सत्यम् ॥ ४४९ ॥ ५ ॥ यथा सोम्यैकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञात ँ स्याद्वाचारम्भणं विकारो नामधेयं कृष्णायसमित्येव सत्यम्, एव ँ सोम्य स आदेशो भवतीति ॥ ४५० ॥ ६ ॥ न वै नून भगवन्तस्त एतदवेदिषुर्यद्ध्येतदवेदिष्यन् कथं मे नावक्ष्यन्निति, भगवा ँ स्त्वेव मे तद्ब्रवीत्विति तथा सोम्येति होवाच ॥ ४५१ ॥ ७ ॥

इति प्रथमः खण्डः ॥ १

— —

सदेव साम्येदमग्र आसीदेकमेवाद्वितीयम् । तद्धैकआहुरसदेवेदमग्र आसीदेकमेवाद्वितीयम् , तस्मादसतः सज्जायत ॥४५२॥१॥ कुतस्तु खलु सोम्यैवꣳ स्यादिति होवाच कथमसतः सज्जायेतेति । सत्त्वेव सोम्येदमग्र आसीत् एकमेवाद्वितीयम् । ४५३ । २ ॥ तदैक्षत बहु स्यां प्रजायेयेति, तत्तेजोऽसृजत, तत्तेज ऐक्षत बहु स्यां प्रजायेयेति तदपोऽसृजत । तस्माद्यत्र क च शोचति स्वेदते वा पुरुषस्तेजस एव तदध्यापोजायते ॥४५४॥३॥ ता आप ऐक्षन्त बह्वयः स्याम प्रजायेमहीति, ता अन्नमसृजन्त; तस्माद् यत्र क च वर्षति तदेव भूयिष्ठमन्नं भवत्यद्भ्य एव तदध्यन्नाद्यं जायते ॥ ४.५ ॥ ४ ॥

इति द्वितीयः खण्डः ॥ २

तृतीयः खण्डः ।

तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जमिति ॥ ४५६ ॥ १ ॥ सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नाम-रूप व्याकरवाणीति ॥ ४५७ ॥ २ ॥ तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति ; सेयं देवतेमास्तिस्रो देवता अनेनैव जीवेनात्मनानुप्रविश्य नाम-रूपे व्याकरोत् ॥ ४५८ ॥ ३ ॥ तासां त्रिवृतं त्रिवृतमेकैकामकरोद् यथा तु खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति, तन्मे वजानीहीति ॥ ४५९ ॥ ४ ॥

इति तृतीयः खण्डः ॥ ३ ॥

चतुर्थः खण्डः ।

यदग्ने रोहितꣳ रूपं तेजसस्तद्रूपम्, यच्छुक्लं तदपाम्, यत् कृष्णं तदन्नस्य; अपागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥ ४६० ॥ १ ॥ यदादित्यस्य रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत् कृष्णं तदन्नस्यापागादादित्यादादित्यत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥ ६१ ॥ २ ॥ यच्चन्द्रमसो रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत् कृष्णं तदन्नस्यापागाच्चन्द्राच्चन्द्रत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥ ६२ ॥ ३ ॥ यद् विद्युतो रोहितꣳरूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत् कृष्णं तदन्नस्यापागाद् विद्युतो विद्युत्त्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥ ४६३ ॥ ४ ॥ एतद्ध स्म वै तद्विद्वाꣳस आहुः पूर्वे महाशाला महाश्रोत्रियाः—न नोऽद्य कश्चनाश्रुतममतमविज्ञातमुदाहरिष्यतीति ह्येभ्यो विदाञ्चक्रुः ॥४६४॥५॥ यदु रोहितमिवाभूदिति तेजसस्तद्रूपमिति तद्विदाञ्चक्रुः, यदु शुक्लमिवाभूदित्यपाꣳ रूपमिति तद्विदाञ्चक्रुर्यदु कृष्णमिवाभूदित्यन्नस्य रूपमिति तद्विदाञ्चक्रुः ॥ ४६५ ॥ ६ ॥ यद्विज्ञातमिवाभूदित्येतासामेव देवतानाꣳ समास इति तद्विदाञ्चक्रुर्यथा तु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति, तन्मे विजानीहीति ॥ ४६६ ॥ ७ ॥

इति चतुर्थः खण्डः ॥ ४ ॥

पञ्चमः खण्डः

अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत् पुरीषं भवति यो मध्यमस्तन्मा౮सं योऽणिष्ठस्तन्मनः ॥ ४६७ ॥ १ ॥ आपः पीतास्त्रेधा विधीयन्ते तासां यः स्थविष्ठो धातुस्तन्मूत्रं भवति यो मध्यमस्तल्लोहितं योऽणिष्ठः स प्राणः ॥ ४६८ ॥ २ ॥ तेजोऽशितं त्रेधा विधीयते—तस्य यः स्थविष्ठो धातुस्तदस्थि भवति यो मध्यमः स मज्जा योऽणिष्ठः सा वाक् ॥ ४६९ ॥ ३ ॥ अन्नमय౮ हि सोम्य, मन आपोमयः प्राणस्तेजोमयी वागिति भूय एव मा भगवान् विज्ञापयत्विति, तथा सोम्येति होवाच ॥४७०॥४ ॥

इति पञ्चमः खण्डः । ५

षष्ठः खण्डः ।

दध्नः सोम्य मथ्यमानस्य योऽणिमा, स ऊर्द्ध्वः समुदीषति, तत् सर्पिर्भवति ॥ ४७१ ॥ १ ॥ एवमेव खलु सोम्यान्नस्याश्यमानस्य योऽणिमा, स ऊर्द्ध्वः समुदीषति, तन्मनो भवति ॥४७२॥२॥ अपा౮ सोम्य पीयमानानां योऽणिमा, स ऊर्द्ध्वः समुदीषति, स प्राणो भवति ॥ ४७३ ॥ ३ ॥ तेजसः सोम्याश्यमानस्य योऽणिमा, स ऊर्द्ध्वः समुदीषति, सा वाग्भवति ॥ ४७४ ॥ ४ ॥ अन्नमय౮ हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति, भूय एव मा भगवान् विज्ञापयत्विति, तथा सोम्येति होवाच ॥४७५॥५॥

इति षष्ठः खण्डः ॥ ६

सप्तमः खण्डः ।

षोड़शकलः सोम्य पुरुषः, पञ्चदशाहानि माशीः; काममपः पिबापोमयः प्राणो न पिबतो विच्छेत्स्यतइति ॥ ४७६ ॥ १ ॥ स ह पञ्चदशाहानि नाशाथ हैनमुपससाद किं ब्रवीमि भो इति, ऋचः सोम्य यजू ꣳषि सामानीति, स होवाच न वै मा प्रतिभान्ति भो इति ॥ ४७७ ॥ २ ॥ त ꣳ होवाच यथा सोम्य महतोऽभ्याहितस्यैकोऽङ्गारः खद्योतमात्रः परिशिष्टः स्यात्तेन ततोऽपि न बहु दहेत्, एव ꣳ सोम्य ते षोड़शानां कलानामेका कलातिशिष्टा स्यात्तयैतर्हि वेदान्नानुभवस्यशान अथ मे विज्ञास्यसीति ॥ ४७८ ॥ ३॥ स हाशाथ हैनमुपससाद, त ꣳ ह यत्किञ्च पप्रच्छ सर्व ꣳ ह प्रतिपेदे ॥ ४७९ ॥ ४ ॥ त ꣳ होवाच यथा सोम्य महतोऽभ्याहितस्यैकमङ्गारं खद्योतमात्रं परिशिष्टं, तं तृणैरुपसमाधाय प्रज्वालयेत् । तेन ततोपि बहु दहेत् ॥ ४८० ॥ ५ ॥ एव ꣳ सोम्य ते षोड़शानां कलानामेका कलातिशिष्टाभूत्, साऽन्नेनोपसमाहिता प्राज्वाली, तयैतर्हि वेदाननुभवस्यान्नमय ꣳ हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति । तद्धास्य विजज्ञाविति विजज्ञाविति ॥४८१॥६॥

इति सप्तमः खण्डः ॥ ७ ॥

अष्टमः खण्डः ।

उद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाच स्वप्नान्तं मे सोम्य विजानीहीति, यत्रैतत् पुरुषः स्वपिति नाम, सता सोम्य तदा सम्पन्नो

भवति—स्वमपीतो भवति, तस्मादेन ꣳ स्वपतीत्याचक्षते—स्व ꣳ ह्यपीतो भवति ॥ ४८२ ॥ १ ॥ स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा बन्धनमेवोपश्रयत एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा प्राण मेवोपश्रयते; प्राणबन्धन ꣳ हि सोम्य मन इति ॥ ४८३ ॥ २ ॥ अशनापिपासे मे सोम्य विजानीहीति यत्रैतत् पुरुषोऽशिशिषति नामाप एव तदशितं नयन्ते तद्यथा गोनायोऽश्वनायः पुरुषनाय; इत्येवं तदप आचक्षते, अशनायेति तत्रैतच्छुङ्गमुत्पतित ꣳ सोम्य विजानीहि नेदममूल ꣳ भविष्यतीति । ४८४ ॥ ३ ॥ तस्य क्व मूल ꣳ स्यादन्यत्रान्नादेवमेव खलु सोम्यान्नेन शुङ्गेनापो मूलमन्विच्छाद्भिः सोम्य शुङ्गेन तेजो मूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत् प्रतिष्ठाः ॥४८५॥४॥ अथ यत्रैतत् पुरुषः पिपासति नाम; तेज एव तत् पीतं नयते; तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तत्तेज आचष्ट उदन्येति, तत्रैतदेव शुङ्गमुत्पतित ꣳ सोम्य विजानीहि नेदममूलं भविष्यतीति ॥ ४८६ ॥ ५ ॥ तस्य क्व मूल ꣳ स्यादन्यत्राद्भ्योऽद्भिः सोम्य शुङ्गेन तेजोमूलमन्विच्छ,तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ, सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः, यथा नु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति, तदुक्तं पुरस्तादेव भवत्यस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि सम्पद्यते, मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवातायाम् ॥ ४८७ ॥ ६ ॥ स यः एषोऽणिमैतदात्म्यमिदं सर्वम्, तत् सत्यं, स आत्मा, तत्त्वमसि

श्वेतकेतो इति। भूय एव मा भगवान् विज्ञापयत्विति, तथा सोम्येति होवाच ॥ ४८८ ॥ ७ ॥

इति अष्टमः खण्डः।

नवमः खण्डः।

यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणाꣳ रसान् समवहारमेकताꣳ रसं गमयन्ति ॥ ४८९ ॥ १ ॥ ते यथा तत्र न विवेकं लभन्तेऽमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सोम्येमाः सर्वाः प्रजाः सति सम्पद्य न विदुः सति सम्पद्यामह इति ॥४९०॥ २॥ त इह व्याघ्रो वा सिंहो वा वृको वा वराहो व कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति, तदा भवन्ति ॥४९१ ॥३॥ स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत् सत्यꣳ स आत्मा, तत्त्वमसि श्वेतकेतो इति, भूय एव मा भगवान् विज्ञापयत्विति, तथा सोम्येति होवाच ॥ ४९२ ॥ ४ ॥

इति नवमः खण्डः ॥ ९ ॥

दशमः खण्डः।

इमाः सोम्य नद्यः पुरस्तात् प्राच्यः स्यन्दन्ते पश्चात् प्रतीच्यस्ताः समुद्र एव भवन्ति, ता यथा तत्र न विदुरियमहमस्मीयमहमस्मीति ॥ ४९३ ॥ १ ॥ एवमेव खलु सोम्येमाः सर्वाः प्रजाः सत आगम्य न विदुः सत आगच्छामह इति, त इह व्याघ्रो वा सिꣳहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दꣳशो वा मशको वा

यद् यद्भवन्ति तदा भवन्ति ॥ ४९४ ॥ २ ॥ स य एषोऽणिमैतदा-त्म्यमिद ँ सर्वं, तत् सत्य ँ स आत्मा, तत्त्वमसि श्वेतकेतो इति। भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्येति होवाच ॥ ४९५ ॥ ३ ॥

इति दशमः खण्डः ॥ १० ॥

एकादशः खण्डः।

अस्य सोम्य महतो वृक्षस्य यो मूलेऽभ्याहन्याज्जीवन् स्रवेद्यो मध्येऽभ्याहन्याज्जीवन् स्रवेद् योऽग्रेऽभ्याहन्याज्जीवन् स्रवेत्; स एष जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति ॥ ४९६ ॥ १ ॥ अस्य यदेका ँ शाखां जीवो जहात्यथ सा शुष्यति, द्वितीयं जहात्यथ सा शुष्यति, तृतीयां जहात्यथ सा शुष्यति, सर्वं जहाति सर्वः शुष्यति ॥ ४९७ ॥ २ ॥ एवमेव खलु सोम्य विद्धीति होवाच, जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति। स य एषोऽणिमैतदात्म्यमिद ँ सर्वं तत् सत्य ँ स आत्मा तत्त्वमसि श्वेतकेतो इति। भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्येति होवाच ॥ ४९८ ॥ ३ ॥

इति एकादशः खण्डः ॥ ११ ॥

द्वादशः खण्डः।

न्यग्रोधफलमत आहरेति, इदं भगव इति, भिन्धीति, भिन्नं भग व इति, किमत्र पश्यसीति, अण्व्य इवेमा धाना भगव इति, आसामङ्गै

भिन्धीति, भिन्ना भगव इति, किमत्र पश्यसीति, न किञ्चन भगव इति ॥ ४९९ ॥ १ ॥ तꣳ होवाच यं वै सोम्यैतमणिमानं न निभालयसे, एतस्य वै सोम्यैषोऽणिम्न एवं महान्यग्रोधस्तिष्ठति, श्रद्धत्स्व सोम्येति ॥ ५०० ॥ २ ॥ स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत् सत्यꣳ स आत्मा, तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान् विज्ञापयत्विति, तथा सोम्येति होवाच ॥ ५०१ ॥ ३ ॥

इति द्वादशः खण्डः ॥ १२ ॥

त्रयोदशः खण्डः ।

लवणमेतदुदकेऽवधायाथ मा प्रातरुपसीदथा इति, स ह तथा चकार तꣳ होवाच—यद्दोषा लवणमुदकेऽवाधा अङ्ग, तदाहरेति, तद्धावमृश्य न विवेद ॥ ५०२ ॥ १ ॥ यथा विलीनमेवाङ्गास्यान्ता दाचामेति, कथमिति ? लवणमिति, मध्यादाचामेति कथमिति ? लवण मिति, अन्तादाचामेति, कथमिति ? लवणमिति । अभिप्रास्यैतदथ मोप-सीदथा इति, तद्ध तथा चकार, तच्छश्वत् संवर्त्तते, तꣳ होवाचात्र वाव किल सत् सोम्य न निभालयसेऽत्रैव किलेति ॥ ५०३ ॥ २ ॥ स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति । भूय एव मा भगवान् विज्ञापयत्विति, तथा सोम्येति होवाच ॥ ५०४ ॥ ३ ॥

इति त्रयोदशः खण्डः ॥ १३ ॥

चतुर्दशः खण्डः ।

यथा सोम्य पुरुषं गन्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने

विसृजेत्, स यथा तत्र प्राङ्वा उदङ्वाधराङ्वा प्रत्यङ्वा प्रध्मायीत अभिनद्धाक्ष आनीतोऽभिनद्धाक्षो विसृष्टः॥५०५॥१॥तस्य यथाभिनहनं प्रमुच्य प्रब्रूयादेतां दिशं गन्धारा एतां दिशं व्रजेति। स ग्रामाद्ग्रामं पृच्छन् पण्डितो मेधावी गन्धारानेवोपसम्पद्येत, एवमेवेहाचार्य्यवान् पुरुषो वेद : तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य इति ॥ ५०६ ॥ २ ॥ स य एषोऽणिमैतदात्म्य मिदꣳ सर्वं तत् सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति। भूय एव मा भगवान् विज्ञापयत्विति। तथा सोम्येति होवाच ॥ ५०७ ॥ ३ ॥

इति चतुर्दशः खण्डः। १४

पञ्चदशः खण्डः।

पुरुषꣳ सोम्योतोपतापिनं ज्ञातयः पर्य्युपासते जानासि मां, जानासि मामिति, तस्य यावन्न वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम्, तावज्जानाति ॥ ५०८ ॥ १ ॥ अथ यदास्य वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामथ न जानाति ॥ ५०९ ॥ २ ॥स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत् सत्यꣳ स आत्मा, तत्त्वमसि श्वेतकेतो इति, त, तथा सोम्येति होवाच॥५१०॥३॥

इति पञ्चदशः खण्डः। १५

षोडशः खण्डः।

...पहार्षीत्—स्तेयम कार्षीत्,

परशुमस्मै तपतेति । स यदि तस्य कर्त्ता भवति, तत एवानृतमात्मानं कुरुते; सोऽनृताभिसन्धोऽनृतेनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति, स दह्यतेऽथ हन्यते ॥ ५ १ ॥ १ ॥ अथ यदि तस्याकर्त्ता भवति, तत एव सत्यमात्मानं कुरुते, स सत्याभिसन्धः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति, स न दह्यतेऽथ मुच्यते ॥ ५१२ ॥ २ ॥ स यथा तत्र नादाह्येत ऐतदात्म्यमिद ँ सर्वं तत् सत्य ँ स आत्मा तत्त्वमसि श्वेतकेतो इति, तद्धास्य विजज्ञाविति विजज्ञाविति॥५१३॥३॥

इति षोड़शः खण्डः ॥ १६ ॥

षष्ठोऽध्यायः समाप्तः ॥

सप्तमोऽध्यायः ।

—:※:—

प्रथमः खण्डः ।

अधीहि भगव इति होपससाद सनत्कुमारं नारदस्तꣳ होवाच यद् वेत्थ तेन मोपसीद, ततस्त ऊर्ध्वं वक्ष्यामीति स होवाच ॥ ५१४ ॥ १ ॥ ऋग्वेदं भगवोऽध्येमि यजुर्वेदꣳ सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यꣳ राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याꣳ सर्पदेवजनविद्यामेतद्भगवोऽध्येमि ॥ ५१५ ॥ २ ॥ सोऽहं भगवो मन्त्रविदेवास्मि नात्मवित्; श्रुतꣳ ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति; सोऽहं भगवः शोचामि, तं मा भगवाञ्छोकस्य पारं तारयत्विति; तꣳ होवाच यद्वै किञ्चैतदध्यगीष्ठा नामैवैतत् ॥ ५१६ ॥ ३ ॥ नाम वा ऋग्वेदो यजुर्वेदः सामवेद आथर्वणश्चतुर्थ इतिहास पुराणः पञ्चमो वेदानां वेदः पित्र्यो राशिर्दैवो निधिर्वाकोवाक्यमेकायनं देवविद्या ब्रह्मविद्या भूतविद्या क्षत्रविद्या नक्षत्रविद्या सर्प-देवजनविद्या नामैवैतन्नामोपास्स्वेति ॥ ५१७ ॥ ४ ॥ स यो नाम ब्रह्मेत्युपास्ते, यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति, यो नाम ब्रह्मेत्युपास्ते; अस्ति भगवो नाम्नो भूय इति, नाम्नो वाव भूयोऽस्तीति, तन्मे भगवान् ब्रवीत्विति ॥ ५१८ ॥ ५ ॥

इति प्रथमः खण्डः ॥ १

द्वितीयः खण्डः।

वाग्वाव नाम्नो भूयसी, वाग्वा ऋग्वेदं विज्ञापयति यजुर्वेदꣳ सामवेदमाथर्वणं चतुर्थमितिहास पुराणं पञ्चमं वेदानां वेदं पित्र्यꣳ राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याꣳ सर्प देवजनविद्यां दिवञ्च पृथिवीञ्च वायुञ्चाकाशञ्चापश्च तेजश्च देवाꣳश्च मनुष्याꣳश्च पशूꣳश्च वयाꣳसिच तृणवनस्पतीञ्छ्वापदान्याकीटपतङ्गपिपीलकं धर्म्मञ्चाधर्म्मञ्च सत्यञ्चानृतञ्च साधु चासाधु च हृदयज्ञञ्चाहृदयज्ञञ्च, यद्वै वाङ्नाभविष्यन्न धर्म्मो नाधर्मो व्यज्ञापयिष्यन्न सत्यं, नानृतं न साधु नासाधु न हृदयज्ञो नाहृदयज्ञो वागेवैतत् सर्वं विज्ञापयति वाचमुपास्स्वेति ॥ ५१९ ॥ १ ॥ स यो वाचं ब्रह्मेत्युपास्ते, यावद्वाचो गतं तत्रास्य यथाकामचारो भवति, यो वाचं ब्रह्मेत्युपास्ते। अस्ति भगवो वाचो भूय इति, वाचो वाव भूयोऽस्तीति, तन्मे भगवान् ब्रवीत्विति ॥ ५२० ॥ २ ॥

इति द्वितीयः खण्डः ॥ २

तृतीयः खण्डः।

मनो वाव वाचो भूयो यथा वै द्वे वामलके द्वे वा कोले द्वौ वाऽक्षौ मुष्टिरनुभवत्येवं वाचञ्च नाम च मनोऽनुभवति, स यदा मनसा मनस्यति मन्त्रानधीयीयेत्यथाधीते, कर्म्माणि कुर्वीयेत्यथ कुरुते पुत्राꣳश्च पशूꣳश्चेच्छेयेत्यथेच्छत इमञ्च लोकममुञ्चेच्छेयेत्यथेच्छते, मनो ह्यात्मा मनोहि लोको मनो हि ब्रह्म मन उपा-

स्येति ॥ ५२१ ॥ १ ॥ स यो मनो ब्रह्मेत्युपास्ते यावन्मनसो गतं, तत्रास्य यथा कामचारो भवति, यो मनो ब्रह्मेत्युपास्तेऽस्ति भगवो मनसो भूय इति, मनसो वाव भूयोऽस्तीति, तन्मे भगवान् ब्रवीत्विति ॥ ५२२ ॥ २ ॥

इति तृतीयः खण्डः ॥ ३

चतुर्थः खण्डः ।

सङ्कल्पो वाव मनसो भूयान्, यदा वै सङ्कल्पयतेऽथ मनस्यत्यथ वाचमीरयति, तामु नाम्नीरयति, नाम्नि मन्त्रा एकं भवन्ति, मन्त्रेषु कर्म्माणीति ॥ ५२३ ॥ १ ॥तानि ह वा एतानि सङ्कल्पैकायनानि सङ्कल्पात्मकानि सङ्कल्पे प्रतिष्ठितानि, समक्लृप्तां द्यावापृथिवी, समकल्पेतां वायुश्चाकाशञ्च, समकल्पन्तामश्च तेजश्च, तेषां संक्लृप्त्यै वर्षꣳ सङ्कल्पते, वर्षस्य सङ्क्लृप्त्या अन्नꣳ सङ्कल्पतेऽन्नस्य संक्लृप्त्यै प्राणाः सङ्कल्पन्ते, प्राणानाꣳ संक्लृप्त्यैमन्त्राः सङ्कल्पन्ते, मन्त्राणाꣳ सङ्क्लृप्त्यै कर्म्माणि सङ्कल्पन्ते; कर्म्मणाꣳ सक्लृप्त्यै लोकः सङ्कल्पते, लोकस्य संक्लृप्त्यै सर्वꣳ सङ्कल्पते; स एषः सङ्कल्पः, सङ्कल्पमुपास्स्वेति ॥ ५२४ ॥ २ ॥ स यः सङ्कल्पं ब्रह्मेत्युपास्ते, क्लृप्तान् वै स लोकान् ध्रुवान् ध्रुवः प्रतिष्ठितान् प्रतिष्ठितोऽव्यथमानानव्यथमानोऽभिसिध्यति । यावत् सङ्कल्पस्य गतं तत्रास्य यथाकामचारो भवति, यः सङ्कल्पं ब्रह्मेत्युपास्ते । अस्ति भगवः सङ्कल्पाद्भूय इति, सङ्कल्पाद् वाव भूयोऽस्तीति, तन्मे भगवान् ब्रवीत्विति ॥ ५२५ ॥ ३ ॥

इति चतुर्थः खण्डः ॥ ४

पञ्चमः खण्डः ।

चित्तं वाव सङ्कल्पाद्भूयो यदा वै चेतयतेऽथ सङ्कल्पयतेऽथ मनस्यत्यथ वाचमीरयति, तामु नाम्नीरयति नाम्नि मन्त्रा एकं भवन्ति मन्त्रेषु कर्म्माणि ॥ ५२६ ॥ १ ॥ तानि ह वा एतानि चित्तैकायनानि चित्तात्मानि चित्ते प्रतिष्ठितानि । तस्माद् यद्यपि बहुविद्चित्तो भवति नायमस्तीत्येवैनमाहुर्यदयं वेद यद्वा अयं विद्वान् नेत्थमचित्तः स्यादिति । अथ यद्यल्पविच्चित्तवान् भवति तस्मा एवोत शुश्रूषन्ते; चित्त ᳫ ह्येवैषामेकायनं चित्तमात्मा चित्तं प्रतिष्ठा चित्तमुपास्स्वेति ॥ ५२७ ॥ २ ॥ स यश्चित्तं ब्रह्मेत्युपास्ते, चितान् वै स लोकान् ध्रुवान्, ध्रुवः प्रतिष्ठितान् प्रतिष्ठितोऽव्यथमानानव्यथमानोऽभिसिध्यति, यावच्चित्तस्य गतम्, तत्रास्य यथाकामचारो भवति, यश्चित्तं ब्रह्मेत्युपास्ते । अस्ति भगवश्चित्ताद्भूय इति, चित्ताद्वाव भूयोऽस्तीति, तन्मे भगवान् ब्रवीत्विति ॥ ५२८ ॥ ३ ॥

इति पञ्चमः खण्डः ॥ ५

षष्ठः खण्डः ।

ध्यानं वाव चित्ताद् भूयो ध्यायतीव पृथिवी ध्यायतीवान्तरिक्षं ध्यायतीव द्यौर्ध्यायन्तीवापो ध्यायन्तीव पर्वता ध्यायन्तीव देवमनुष्याः; तस्माद् य इह मनुष्याणां महत्तां प्राप्नुवन्ति ध्यानापादा ᳫ शा इवैव ते भवन्त्यथ येऽल्पाः कलहिनः पिशुना उपवादिन स्ते अथ ये प्रभवो ध्यानापादा ᳫ शा इवैव ते भवन्ति; ध्यानमुपास्स्वेति ॥ ५२९ ॥ १ ॥

स यो ध्यानं ब्रह्मेत्युपास्ते, यावद् ध्यानस्य गतं, तत्रास्य यथाकामचारो भवति, यो ध्यानं ब्रह्मेत्युपास्ते । अस्ति भगवो ध्यानाद्भूय इति, ध्यानाद्वाव भूयोऽस्तीति, तन्मे भगवान् ब्रवीत्विति ॥ ५३० ॥ २ ॥

इति षष्ठः खण्डः ॥ ६ ॥

सप्तमः खण्डः ।

विज्ञानं वाव ध्यानाद्भूयो विज्ञानेन वा ऋग्वेदं विजानाति यजुर्वेद ᳪ सामवेदमाथर्वणं चतुर्थमितिहास पुराणं पञ्चमं वेदानां वेदं पित्र्य ᳪ राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्या ᳪ सर्प—देवजनविद्यां दिवञ्च पृथिवीञ्च वायुञ्चाकाशञ्चापश्च तेजश्च देवा ᳪ श्च मनुष्या ᳪ श्च वया ᳪ सि च तृण—वनस्पतीञ्छ्वापदान्याकीट पतङ्ग पिपीलकं धर्म्मञ्चाधर्म्मञ्च सत्यञ्चानृतञ्च साधु चासाधु च हृदयज्ञञ्चाहृदयज्ञञ्चान्नञ्च रसं चेमं च लोकममुञ्च विज्ञानेनैव विजानाति; विज्ञानमुपास्स्वेति ॥ ५३१ ॥ १ ॥ स यो विज्ञानं ब्रह्मेत्युपास्ते विज्ञानवतो वै स लोकान् ज्ञानवतोऽभिसिध्यति; यावद्विज्ञानस्य गतं तत्रास्य यथाकामचारो भवति, यो विज्ञानं ब्रह्मेत्युपास्ते । अस्ति भगवो विज्ञानाद्भूय इति, विज्ञानाद्वाव भूयोऽस्तीति, तन्मे भगवान् ब्रवीत्विति ॥ ५३२ ॥ २ ॥

इति सप्तमः खण्डः ॥ ७ ॥

अष्टमः खण्डः ।

वलं वाव विज्ञानाद्भूयोऽपि ह शतं विज्ञानवतामेको वलवानाकम्पयते, स यदा वली भवत्यथोत्थाता भवत्युत्तिष्ठन् परिचरिता भवति परिचरन्नुपसत्ता भवत्युपसीदन् द्रष्टा भवति श्रोता भवति मन्ता भवति वोद्धा भवति कर्त्ता भवति विज्ञाता भवति; वलेन वै पृथिवी तिष्ठति वलेनान्तरिक्षं वलेन द्यौर्वलेन पर्वता वलेन देव-मनुष्या वलेन पशवश्च वया ᳪ सि च तृणवनस्पतयः श्वापदान्याकीटपतङ्ग पिपीलकं वलेन लोकस्तिष्ठति वलमुपास्स्वेति ॥ ५३३ ॥ १ ॥ स यो वलं ब्रह्मेत्युपास्ते यावद्बलस्य गतं तत्रास्य यथाकामचारो भवति यो वलं ब्रह्मेत्युपास्ते अस्ति भगवो वलाद्भूय इति; वलाद्वाव भूयोऽस्तीति, तन्मे भगवान् ब्रवीत्विति ॥ ५३४ ॥ २ ॥

इति अष्टमः खण्डः ॥ ८ ॥

नवमः खण्डः ।

अन्नं वाव वलाद्भूयस्तस्माद् यद्यपि दश रात्रीर्नाश्नीयाद् यद्यु ह जीवेदथवाऽद्रष्टाऽश्रोताऽमन्ताऽवोद्धाऽकर्त्ताऽविज्ञाता भवति । अथान्नस्यायै द्रष्टा भवति श्रोता भवति मन्ता भवति वोद्धा भवति कर्त्ता भवति विज्ञाता भवत्यन्नमुपास्स्वेति ॥ ५३५ ॥ १ ॥ स योऽन्नं ब्रह्मेत्युपास्तेऽन्नवतो वै स लोकान् पानवतोऽभिसिध्यति यावदन्नस्य गतं तत्रास्य यथाकामचारो भवति योऽन्नं ब्रह्मेत्युपास्ते । अस्ति भगवोऽन्नाद्भूय इति । अन्नाद्वाव भूयोऽस्तीति । तन्मे भगवान् ब्रवीत्विति ॥ ५३६ ॥ २ ॥

इति नवमः खण्डः ॥ ९ ॥

दशमः खण्डः ।

आपो वा अन्नाद्भूयस्तस्माद् यदा सुवृष्टिर्न भवति व्याधीयन्ते प्राणा अन्नं कनीयो भविष्यतीति, अथ यदा सुवृष्टिर्भवत्यानन्दिनः प्राणा भवन्त्यन्नं बहु भविष्यतीति; आप एवेमा मूर्त्ताः—येयं पृथिवी यदन्तरिक्षं यद्द्यौर्यत् पर्वता यद्देव-मनुष्या यत् पशवश्च वयाꣳसि च तृण-वनस्पतयः श्वापदान्या कीट पतङ्गपिपीलकम् आप एवेमा मूर्त्ताः अप उपास्स्वेति ॥ ५३७ ॥ १ ॥ स योऽपो ब्रह्मेत्यु-पास्त आप्नोति सर्वान् कामाꣳ स्तृप्तिमान् भवति, यावदपां गतं, तत्रास्य यथाकामचारो भवति योऽपो ब्रह्मेत्युपास्ते । अस्ति भगवोऽ-द्भ्यो भूय इति । अद्भ्यो वाव भूयोऽस्तीति । तन्मे भगवान् ब्रवी-त्विति ॥ ५३८ ॥ २ ॥

इति दशमः खण्डः ॥ १० ॥

एकादशः खण्डः ।

तेजो वावाद्भ्यो भूयस्तद्वा एतद्वायुमागृह्याकाशमभितपति, तदा-हुर्निशोचति नितपति वर्षिष्यति वा इति । तेज एव तत् पूर्वं दर्शयित्वा-ऽथापः सृजते; तदेतदूर्ध्वाभिश्च तिरश्चीभिश्च विद्युद्भिराह्रादाश्चरन्ति, तस्मादाहुर्विद्योतते स्तनयति वर्षिष्यति वा इति, तेज एव तत् पूर्वं दर्शयित्वाथापः सृजते; तेज उपास्स्वेति ॥ ५३९ ॥ १ ॥ स यस्तेजो ब्रह्मेत्युपास्ते, तेजस्वी वै स तेजस्वतो लोकान् भास्वतोऽपहततमस्कान-भिसिध्यति, यावत्तेजसो गतं तत्रास्य यथाकामचारो भवति, यस्तेजो

ब्रह्मेत्युपास्ते अस्ति भगवस्तेजसो भूय इति । तेजसो वाव भूयोऽस्तीति । तन्मे भगवान् ब्रवीत्विति ।। ५४० ।। २ ।।

इति एकादशः खण्डः ।। ११ ।।

द्वादशः खण्डः ।

आकाशो वाव तेजसो भूयानाकाशे वै सूर्य्याचन्द्रमसावुभौ विद्युन्नक्षत्राण्यग्निराकाशेनाह्वयत्याकाशेन शृणोत्याकाशेन प्रतिशृणोत्याकाशे रमत आकाशे न रमत आकाशे जायत आकाशमभिजायते, आकाशमुपास्स्वेति ।। ५४१ ।। २ ।। स य आकाशं ब्रह्मेत्युपास्त आकाशवतो वै स लोकान् प्रकाशवतोऽसंबाधानुरुगायवतोऽभिसिध्यति, यावदाकाशस्य गतं तत्रास्य यथाकामचारो भवति, य आकाशं ब्रह्मेत्युपास्ते। अस्ति भगव आकाशाद् भूय इति । आकाशाद्वाव भूयोऽस्तीति, तन्मे भगवान् ब्रवीत्विति ।। ५४२ ।। २ ।।

इति द्वादशः खण्डः ।। २ ।।

त्रयोदशः खण्डः ।

स्मरो वावाकाशाद् भूयस्तस्माद् यद्यपि बहव आसीरन्न स्मरन्तो नैव ते कञ्चन शृणुयुर्न मन्वीरन्न विजानीरन्, यदा वाव ते स्मरेयुरथ शृणुयुरथ मन्वीरन्नथ विजानीरन्, स्मरेण वै पुत्रान् विजानाति स्मरेण पशून्; स्मरमुपास्स्वेति ।। ५४३ ।। १ ।। स यः स्मरं ब्रह्मेत्युपास्ते यावत् स्मरस्य गतं तत्रास्य यथाकामचारो भवति, यः स्मरं ब्रह्मेत्युपास्ते । अस्ति भगवः स्मराद्भूय इति । स्मराद्वाव भूयोऽस्तीति। तन्मे भगवान् ब्रवीत्विति ।। ५४४ ।। २ ।।

इति त्रयोदशः खण्डः । १३ ।।

चतुर्दशः खण्डः ।

आशा वाव स्मरद्भूयस्याशेद्धो वै स्मरो मन्त्रानधीते कर्म्माणि कुरुते पुत्राꣳश्च पशूꣳश्चेच्छत इमञ्च लोकममुञ्चेच्छते; आशामुपास्स्वेति ॥ ५४५ ॥ १ ॥ स य आशां ब्रह्मेत्युपास्ते आशयास्य सर्वे कामाः समृध्यन्त्यमोघा हास्याशिषो भवन्ति यावदाशाया गतं तत्रास्य यथाकामचारो भवति, य आशां ब्रह्मेत्युपास्ते । अस्ति भगव आशाया भूय इति । आशाया वाव भूयोऽस्तीति । तन्मे भगवान् ब्रवीत्विति ५४६ ॥ २ ॥

इति चतुर्दशः खण्डः ॥ १४

पञ्चदशः खण्डः ।

प्राणो वा आशाया भूयान्; यथा वा अरा नाभौ समर्पिता एवमस्मिन् प्राणे सर्वꣳ समर्पितम्; प्राणः प्राणेन याति प्राणः प्राणं ददाति प्राणाय ददाति प्राणो ह पिता प्राणो माता प्राणो भ्राता प्राणः स्वसा प्राण आचार्य्यः प्राणो ब्राह्मणः ॥५४७॥१॥ स यदि पितरं वा मातरं वा भ्रातरं वा स्वसारं वाचार्य्यं वा ब्राह्मणं वा किञ्चिद्भृशमिव प्रत्याह धिक् त्वास्त्वित्येवैनमाहुः—पितृहा वै त्वमसि मातृहा वै त्वमसि भ्रातृहा वै त्वमसि स्वसृहा वै त्वमस्याचार्य्यहा वै त्वमसि ब्राह्मणहा वै त्वमसीति ॥ ५४८ ॥ २ ॥ अथ यद्यप्येनानुत्क्रान्तप्राणाञ्छूलेन समासं व्यतिषन्दहेन्नैवैनं ब्रूयुः पितृहासीति—न मातृहासीति, न भ्रातृहासीति, न स्वसृहासीति, नाचार्य्यहासीति, न ब्राह्मणहासीति ॥ ५४९ ॥ ३ ॥ प्राणोह्येवै-

तानि सर्वाणि भवति स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति, तं चेद्ब्रूयुरति वाद्यसीत्यतिवाद्यस्मीति ब्रूयान्नापह्नुवीत ॥ १५० ॥ ४ ॥

इति पञ्चदशः खण्डः ॥ १५

षोडशः खण्डः।

एष तु वा अतिवदति यः सत्येनातिवदति। सोऽहं भगवः सत्येनातिवदानीति। सत्यं त्वेव विजिज्ञासितव्यमिति। सत्यं भगवो विजिज्ञास इति ॥ १५१ ॥ १ ॥

इति षोडशः खण्डः ॥ १६

सप्तदशः खण्डः।

यदा वै विजानात्यथ सत्यं वदति, नाविजानन् सत्यं वदति विजानन्नेव सत्यं वदति, विज्ञानं त्वेव विजिज्ञासितव्यमिति, विज्ञानं भगवो विजिज्ञास इति ॥ १५२ ॥ १ ॥

इति सप्तदशः खण्डः ॥ १७

अष्टादशः खण्डः।

यदा वै मनुतेऽथ विजानाति, नामत्वा विजानाति, मत्वैव विजानाति, मतिस्त्वेव विजिज्ञासितव्येति। मतिं भगवो विजिज्ञास इति ॥ १५३ ॥ १ ॥

इति अष्टादशः खण्डः ॥ १८

ऊनविंशः खण्डः ।

यदा वै श्रद्दधात्यथ मनुते, नाश्रद्दधन् मनुते, श्रद्दधदेव मनुते, श्रद्धा त्वेव विजिज्ञासितव्येति, श्रद्धां भगवो विजिज्ञास इति ॥५५४॥१

इति ऊनविंशः खण्डः ॥ १९

विंशः खंडः ।

यदा वै निस्तिष्ठत्यथ श्रद्दधाति नानिस्तिष्ठं श्रद्दधाति निस्तिष्ठन्नेव श्रद्दधाति । निष्ठा त्वेव विजिज्ञासितव्येति, निष्ठां भगवो विजिज्ञास इति ॥ ५५५ ॥ १ ॥

इति विंशः खण्डः २०

एकविंशः खण्डः ।

यदा व करोत्यथ निस्तिष्ठति नाकृत्वा निस्तिष्ठति कृत्वैव निस्तिष्ठति कृतिस्त्वेव विजिज्ञासितव्येति । कृतिं भगवो विजिज्ञास इति ॥ ५५६ ॥ १ ॥

इति एकविंशः खण्डः ॥ २१

द्वाविंशः खण्डः ।

यदा वै सुखं लभतेऽथ करोति नासुखं लब्ध्वा करोति सुखमेव लब्ध्वा करोति सुखं त्वेव विजिज्ञासितव्यमिति । सुखं भगवो विजिज्ञास इति ॥ ५५७ ॥ १ ॥

इति द्वाविंदशः खण्डः ॥ २२

त्रयोविंशः खण्डः ।

यो वै भूमा तत् सुखं, नाल्पे सुखमस्ति, भूमैव सुखं, भूमा त्वेव विजिज्ञासितव्य इति । भूमानं भगवो विजिज्ञास इति ॥५५८॥१

इति त्रयोविंशः खण्डः ॥ २३

चतुर्विंशः खण्डः ।

यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा, अथ यत्रान्यत् पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पं, यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यꣳ स भगवः कस्मिन् प्रतिष्ठित इति, स्वे महिम्नि, यदि वा न महिम्नीति ॥ ५५९ ॥ १ ॥ गो अश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायतनानीति, नाहमेवं ब्रवीमि ब्रवीमीति होवाचान्यो ह्यन्यस्मिन् प्रतिष्ठित इति ॥ ५६० ॥ २ ॥

इति चतुर्विंशः खण्डः ॥२४॥

पंचविंशः खण्डः ।

स एवाधस्तात् स उपरिष्टात् स पश्चात् स पुरस्तात् स दक्षिणतः स उत्तरतः स एवेदꣳ सर्वमिति । अथातोऽहङ्कारादेश एवाहमेवाधस्तादहमुपरिष्टादहं पश्चादहं पुरस्तादहं दक्षिणतोऽहमुत्तरतोऽहमेवेदꣳ सर्वमिति ॥ ५६१ ॥ १ ॥ अथात आत्मादेश एव आत्मैवाधस्तादात्मोपरिष्टादात्मा पश्चादात्मा पुरस्तादात्मा दक्षिणत आत्मोत्तर आत्मैवेदꣳ सर्वमिति सवा एप एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड़ आत्ममिथुन आत्मानन्दः स स्वराड् भवति तस्य

सर्वेषु लोकेषु कामचारो भवति । अथ येऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति तेषाꣳ सर्वेषु लोकेष्वकामचारो भवति ॥ ५६२ ॥ २ ॥

इति पञ्चविंशः खण्डः ॥ २५ ॥

षड्विंशः खण्डः ।

तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राण आत्मत आशात्मतः स्मर आत्मात आकाश आत्मतस्तेज आत्मत आप आत्मत आविर्भावतिरोभावावात्मतोऽन्नमात्मतो बलमात्मतो विज्ञानमात्मतो ध्यान मात्मश्चित्तमात्मतो बलमात्मतः सङ्कल्प आत्मतो मन आत्मतो वागात्मतो नामात्मतो मन्त्रा आत्मतः कर्म्माण्यात्मत एवेदꣳ सर्वमिति ॥ ५६३ ॥ १ ॥ तदेष श्लोक :—

न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताꣳ सर्वꣳह पश्यः पश्यति सर्वमाप्नोति सर्वश इति ।

स एकधा भवति त्रिधा भवति, पञ्चधा
सप्तधा नवधा चैव पुनश्चैकादशः स्मृतः
शतञ्च दश चैकश्च सहस्राणि च विꣳशतिः ।

आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः, स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमार स्तꣳस्कन्द इत्याचक्षते तꣳ स्कन्द इत्याचक्षते ॥ ५६४ ॥ २ ॥

इति षड्विंशः खण्डः ॥ २६ ॥

सप्तमोऽध्यायः समाप्तः ॥ ७ ॥

अष्टमोऽध्यायः।

प्रथमः खण्डः।

अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म, दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति ॥ ५६५ ॥ १ ॥ तञ्चेद् ब्रूयुर्यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं-वेश्म, दहरोऽस्मिन्नन्तराकाशः, किं तदत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमिति स ब्रूयात् ॥ ५६५ ॥ २ ॥ यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्य्याचन्द्रमसावुभौ विद्युन्नक्षत्राणि यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहितमिति ॥ ५६७ ॥ ३ ॥ तञ्चेद् ब्रूयुरस्मिꣳश्चेदिदं ब्रह्म-पुरे सर्वꣳ समाहितꣳ सर्वाणि च भूतानि सर्वे च कामाः, यदैतज्जरा वाप्नोति प्रध्वꣳसते वा किं ततोऽतिशिष्यत इति ॥ ५६८ ॥ ४ ॥ स ब्रूयान्नास्य जरयैतज्जीर्य्यति न वधेनास्य हन्यते एतत् सत्यं ब्रह्मपुरमस्मिन् कामाः समाहिताः; एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पो यथा ह्येवेह प्रजा अन्वाविशन्ति, यथानुशासनं यं यमन्तमभिकामा भवन्ति यं जनपदं यं क्षेत्रभागं तं तमेवोपजीवन्ति ॥ ५६९ ॥ ५ ॥ तद्यथेह कर्म्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते। तद्य इहात्मानमननुविद्य व्रजन्त्येताꣳश्च सत्यान् कामाꣳ स्तेषाꣳ सर्वेषु लोकेष्वकामचारो

भवति । अथ य इहात्मानमनुविद्य व्रजन्त्येताꣳश्च सत्यान् कामाꣳ स्तेषाꣳ सर्वेषु लोकेषु कामचारो भवति ॥ ५७० ॥ १ ॥

इति प्रथमः खण्डः ॥ १ ॥

द्वितीयः खण्डः ।

स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति, तेन पितृलोकेन सम्पन्नो महीयते ॥ ५७१ ॥ १ ॥ अथ यदि मातृलोककामो भवति सङ्कल्पादेवास्य मातरः समुत्तिष्ठन्ति, तेन मातृलोकेन सम्पन्नो महीयते ॥ ५७२ ॥ २ ॥ अथ यदि भ्रातृलोककामो भवति सङ्कल्पादेवास्य भ्रातरः समुत्तिष्ठन्ति, तेन भ्रातृलोकेन सम्पन्नो महीयते ॥ ५७३ ॥ ३ ॥ अथ यदि स्वसृलोककामो भवति सङ्कल्पादेवास्य स्वसारः समुत्तिष्ठन्ति, तेन स्वसृलोकेन सम्पन्नो महीयते ॥ ५७४ ॥ ४ ॥ अथ यदि सखिलोककामो भवति सङ्कल्पादेवास्य सखायः समुत्तिष्ठन्ति, तेन सखिलोकेन सम्पन्नो महीयते ॥ ५७५ ॥ ५ ॥ अथ यदि गन्ध-माल्य लोककामो भवति सङ्कल्पादेवास्य गन्धमाल्ये समुत्तिष्ठतस्तेन गन्ध-माल्यलोकेन सम्पन्नो महीयते ॥ ५७६ ॥ ६ ॥ अथ यद्यन्न-पान लोककामो भवति सङ्कल्पादेवास्यान्नपाने समुत्तिष्ठतस्तेनान्न-पान लोकेन सम्पन्नो महीयते ॥ ५७७ ॥ ७ ॥ अथ यदि गीत-वादित्रलोक कामो भवति सङ्कल्पादेवास्य गीतवादित्रे समुत्तिष्ठतस्तेन गीत-वादित्र लोकेन सम्पन्नो महीयते ॥ ५७८ ॥ ८ ॥ अथ यदि स्त्रीलोककामो भवति सङ्कल्पादेवास्य स्त्रियः समुत्तिष्ठन्ति, तेन स्त्रीलोकेन सम्पन्नो महीयते

। ५७९ ॥ ९ ॥ यं यमन्तमभिकामो भवति यं कामं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठति, तेन सम्पन्नो महीयते ॥५८०। १०॥

इति द्वितीयः खण्डः ॥ २

तृतीयः खण्डः।

त इमे सत्याः कामा अनृतापिधानास्तेषाᳬ सत्यानाᳬ सतामनृतमपिधानम्, यो यो ह्यस्येतः प्रैति न तमिह दर्शनाय लभते ॥ ५८१ ॥ १ ॥ अथ येचास्येह जीवा ये च प्रेता यच्चान्यदिच्छन्न लभते सर्वं तदत्र गत्वा विन्दतेऽत्र ह्यस्यैते सत्याः कामा अनृतापिधानाः। तद् यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो न विन्देयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः ॥ ५८२ ॥ २ ॥ स वा एष आत्मा हृदि तस्यैतदेव निरुक्तᳬ हृद्ययमिति तस्माद्धृदयम्, अहरहर्वा एवंवित् स्वर्गंलोक मेति ॥ ५८३ ॥ ३ अथ य एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्मेति, तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति ॥ ५८४ ॥ ४ ॥ तानि ह वा एतानि त्रीण्यक्षराणि सतीयमिति, तद्यत् सत्तदमृतमथ यत्ति तन्मर्त्यमथ यद्यं तेनोभे यच्छति, यदनेनोभे यच्छति तस्माद् यमहरहर्वा एवंवित् स्वर्गं लोकमेति ॥ ५८५ ॥ ५ ॥

इति तृतीयः खण्डः। ३

चतुर्थः खण्डः

अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसम्भेदाय, नैत ᳪ सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृत ᳪ सर्वे पाप्मानोऽतो निवर्त्तन्तेऽपहतपाप्मा ह्येष ब्रह्मलोकः ॥५८६॥१॥ तस्माद्वा एत ᳪ सेतुं तीर्त्वाऽन्धः सन्ननन्धो भवति, विद्धः सन्नविद्धो भवत्युपतापी सन्ननुपतापी भवति, तस्माद्वा एत ᳪ सेतुं तीर्त्वापि नक्तमहरेवाभिनिष्पद्यते, सकृद्विभातो ह्येवैष ब्रह्म लोकः ॥ ५८७ ॥ २ ॥ तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्य्येणानुविन्दन्ति, तेषामेवैष ब्रह्मलोकस्तेषा ᳪ सर्वेषु लोकेषु कामचारो भवति ॥५८८॥३॥

इति चतुर्थः खण्डः ॥ ४

पञ्चमः खण्डः ।

अथ यद्यज्ञ इत्याचक्षते ब्रह्मचर्य्यमेव तत्, ब्रह्मचर्य्येण ह्येव यो ज्ञाता तं विन्दते, अथ यदिष्टमित्याचक्षते ब्रह्मचर्य्यमेव तत्, ब्रह्मचर्य्येण ह्येवेष्ट्वात्मानमनुविन्दते ॥ ५८९ ॥ १ ॥ अथ यत् सत्रायणमित्याचक्षत ब्रह्मचर्य्यमेव तत्, ब्रह्मचर्य्येण ह्येव सत आत्मनस्त्राणं विन्दते अथ यन्मौनमित्याचक्षते ब्रह्मचर्य्यमेव तत्. ब्रह्मचर्य्येण ह्येवात्मानमनुविद्य मनुते ॥ ५९० ॥ २ ॥ अथ यदनाशकायनमित्याचक्षते ब्रह्मचर्य्यमेव तत्; एष ह्यात्मा न नश्यति यं ब्रह्मचर्य्येणानुविन्दते । अथ यदरण्यायनमित्याचक्षते ब्रह्मचर्य्यमेव तत्, अरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोके तृतीय स्यामितो दिवि; तदैरं मदीय ᳪ सरस्तदश्वत्थः सोम सवनस्तदपराजिता पूर्ब्रह्मणः प्रभुविमित ᳪ

हिरण्मयम् ॥ ५९१ ॥ ३ ॥ तद्य एवैतावरं च ण्यं चार्णवौ ब्रह्मलोके ब्रह्मचर्य्येणानुविन्दन्ति, तेषामेवैष ब्रह्मलोकस्तेषां सर्वेषु लोकेषु कामचारो भवति ॥ ५९२ ॥ ४ ॥

इति पञ्चमः खण्डः ॥ ५

षष्ठः खण्डः ।

अथ या एता हृदयस्य नाड्यस्ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्येति । असौ वा आदित्यः पिङ्गल एष शुक्ल एष नील एष पीत एष लोहितः ॥ ५९३ ॥ १ ॥ तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमञ्चामुञ्चैवमेवैता आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीमञ्चामुञ्चामुष्मादादित्यात् प्रतायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ताः ॥५९४॥ २॥ तद्यत्रैतत् सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न विजानात्यासु तदा नाडीषु सृप्तो भवति, तन्न कश्चन पाप्मा स्पृशति तेजसा हि तदा सम्पन्नो भवति ॥ ५९५ ॥ ३ ॥ अथ यत्रैतदबलिमानं नीतो भवति तमभित आसीना आहुर्जानासि मां जानासि मामिति । स यावद्-स्माच्छरीरादनुत्क्रान्तो भवति तावज्जानाति ॥ ५९६ ॥ ४ ॥ अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्द्ध्वमाक्रमते । स ओमिति वा होद्वा मीयते; स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छत्येतद्वै खलु लोकद्वारं विदुषां प्रपदनं निरोधोऽविदुषाम् ॥ ५९७ ॥ ५ ॥ तदेष श्लोकः :—

शतञ्चैका च हृदयस्य नाड्यस्तासां मूर्द्धानमभिनिःसृतैका ।

तयोर्द्ध्वमायन्नमृतत्व मेति विष्वङ्ङन्या उत्क्रमणे भवन्त्युत्क्रमणे भवन्ति ॥ ५९८ ॥ ६ ॥

इति षष्ठः खण्डः ॥ ६

सप्तमः खण्डः ।

य आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः, सोऽन्वेष्टव्यः स विजिज्ञासितव्यः; स सर्वाᳬंश्च लोकानाप्नोति सर्वाᳬंश्च कामान् यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच ॥ ५९९ ॥ १ ॥ तद्धोभये देवासुरा अनुबुबुधिरे, ते होचुर्हन्त तमात्मानमन्विच्छामो यमात्मानमन्विष्य सर्वाᳬंश्च लोकानाप्नोति सर्वाᳬंश्च कामानिति । इन्द्रो हैव देवानामभिप्रवव्राज विरोचनोऽसुराणाम्, तौ हासंविदानावेव समित्पाणी प्रजापतिसकाशमाजग्मतुः ॥ ६०० ॥ २ तौ ह द्वात्रिᳬंशतं वर्षाणि ब्रह्मचर्य्यमूषतुस्तौ ह प्रजापतिरुवाच किमिच्छन्तावत्रास्तमिति, तौ होचतुर्य आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः, सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वाᳬंश्च लोकानाप्नोति सर्वाᳬंश्च कामान् यस्तमात्मानमनुविद्य विजानातीति भगवतो वचो वेदयन्ते तमिच्छन्ताववास्तमिति ॥ ६०१ ॥ ३ ॥ तौ ह प्रजापतिरुवाच य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति । अथ योऽयं भगवोऽप्सु परिख्यायते यश्चायमादर्शे कतम एष इत्येष उ एवैषु सर्वेष्वन्तेषु परिख्यायत इति होवाच ॥ ६०२ ॥ ४ ॥

इति सप्तमः खण्डः ॥ ७

अष्टमः खण्डः ।

उदशराव आत्मानमवेक्ष्य यदात्मानो न विजानीथस्तन्मे प्रब्रूत-मिति । तौ होदशरावेऽवेक्षाञ्चक्राते । तौ ह प्रजापतिरुवाच किं पश्यथ इति, तौ होचतुः सर्वमेवेदमावां भगव आत्मानं पश्याव आलोमभ्य आनखेभ्यः प्रतिरूपमिति ॥ ६०३ ॥ १ ॥ तौ ह प्रजा-पतिरुवाच साध्वलङ्कृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावेऽवेक्षेथा-मिति । तौ ह साध्वलङ्कृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावे-ऽवेक्षाञ्चक्राते । तौ ह प्रजापतिरुवाच किं पश्यथ इति ॥६०४॥२॥ तौ होचतुर्यथैवेदमावां भगवः साध्वलङ्कृतौ सुवसनौ परिष्कृतौ स्व एवमेवेमौ भगवः साध्वलङ्कृतौ सुवसनौ परिष्कृताविस्येष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्मेति, तौ ह शान्तहृदयौ प्रवव्रजतुः ॥ ६०५ ॥ ३ ॥ तौ हान्वीक्ष्य प्रजापतिरुवाच अनु-पलभ्यात्मानमननुविद्य व्रजतो यतर एतदुपनिषदो भविष्यन्ति देवा वासुरा वा, ते पराभविष्यन्तीति स ह शान्त हृदय एव विरोचनो-ऽसुरान् जगाम, तेभ्यो हैतामुपनिषदं प्रोवाचात्मैवेह महय्य आत्मा परिचर्य्य आत्मानमेवेह महयन्नात्मानं परिचरन्नुभौ लोकाव-वाप्नोतीमञ्चामुञ्चेति ॥ ६०६ ॥ ४ ॥ तस्मादप्यद्येहाददानमश्रद्द-धानमयजमानमाहुरासुरो बतेत्यसुराणाᳯ ह्येषोपनिषत् प्रेतस्य शरीरं भिक्षया वसनेनालङ्कारेणेति सᳯ स्कुर्वन्त्येतेन ह्यमुं लोकं जेष्यन्तो मन्यन्ते ॥ ६०७ ॥ ५ ॥

इति अष्टमः खण्डः ॥ ८

नवमः खण्डः।

अथ हेन्द्रोऽप्राप्यैव देवानेतद्भयं ददर्श—यथैव खल्वयमस्मिञ्छरीरे साध्वलङ्कृते भवति सुवसने सुवसनः परिष्कृते परिष्कृतः, एवमेवायमस्मिन्नन्धेऽन्धो भवति स्रामे स्रामः परिवृक्णे परिवृक्णोऽस्यैव शरीरस्य नाशमन्वेष नश्यति, नाहमत्र भोग्यं पश्यामीति ॥६०८॥१॥ स समित्पाणिः पुनरेयाय, तꣳ ह प्रजापतिरुवाच—मघवन् यच्छान्तहृदयः प्राव्राजीः सार्द्धं विरोचनेन किमिच्छन् पुनरागम इति। स होवाच यथैव खल्वयं भगवोऽस्मिञ्छरीरे साध्वलंकृते साध्वलङ्कृतो भवति सुवसने सुवसनः परिष्कृते परिष्कृत एवमेवायमस्मिन्नन्धेऽन्धो भवति स्रामे स्रामः परिवृक्णे परिवृक्णोऽस्यैव शरीरस्य नाशमन्वेष नश्यति नाहमत्र भोग्यं पश्यामीति ॥ ६०९ ॥ २ ॥ एवमेवैष मघवन्निति होवाचैतन्त्वेव ते भूयोऽनु व्याख्यास्यामि वसापराणि द्वात्रिꣳशतं वर्षाणीति ॥ स हा पराणि द्वात्रिꣳशतं वर्षाण्युवास तस्मै होवाच ॥ ६१० ॥ ३ ॥

इति नवमः खण्डः ॥ ९

दशमः खण्डः।

य एष स्वप्ने महीयमानश्चरत्येष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्मेति। स ह शान्त हृदयः प्रवव्राज, स हा प्राप्यैव देवानेतद्भयं ददर्श—तद् यद्यपीदꣳ शरीरमन्धं भवत्यनन्धःस भवति, यदि स्राममस्रामो नैवैषोऽस्य दोषेण दुष्यति ॥ ६११ ॥ १ ॥ न वधेनास्य हन्यते नास्य स्राम्येण स्रामो घ्नन्ति त्वेवैनं विच्छादयन्तीवाप्रियवेत्तेव भवत्यपि रोदितीव, नाहमत्र भोग्यं पश्यामीति ॥ ६१२ ॥ २ ॥

स समित्पाणिः पुनरेयाय त ᳪ ह प्रजापतिरुवाच मघवन् यच्छान्त हृदयः प्राव्राजीः किमिच्छन् पुनरागम इति। स होवाच तद्यद्यपीदं भगवः शरीरमन्धं भवत्यनन्धःस भवति, यदि स्राममस्रामो नैवैषो-ऽस्य दोषेण दुष्यति ॥६१३॥३॥ न वधेनास्य हन्यते नास्य स्राम्येण स्रामो घ्नन्ति त्वेवेनं विच्छादयन्ती वाप्रियवेत्तेव भवत्यपि रोदि-तीव, नाहमत्र भोग्यं पश्यामीत्येवमेवैष मघवन्निति होवाच तन्त्वेव ते भूयोऽनु व्याख्यास्यामि वसापराणि द्वात्रि ᳪ शतं वर्षाणीति। स हापराणि द्वात्रिᳪ शतं वर्षाण्युवास तस्मै होवाच ॥ ६१४ ॥ ४ ॥

इति दशमः खण्डः ॥ १०

एकादशः खण्डः।

तद् यत्रैतत् सुप्तः समस्तः सम्प्रसन्नः स्वप्नं विजानात्येष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्मेति। स ह शान्त हृदयः प्रवव्राज, स हा प्राप्यैव देवानेतद्भयं ददर्श—नाहं खल्वयमेवं सम्प्र-त्यात्मानं जानात्ययमहस्मीति; नो एवमानि भूतानि, विनाश मेवापीतो भवति; नाहमत्र भोग्यं पश्यामीति ॥ ६१५ ॥ १ ॥ स समित्पाणिः पुनरेयाय तᳪ ह प्रज पतिरुवाच मघवन् यच्छान्तहृदयः प्राव्राजीः किमिच्छन् पुनरागम इति। स होवाच नाहं खल्वयं भगव एवᳪ सम्प्रत्यात्मानं जानात्ययमहस्मीति नो एवेमानि भूतानि, विनाशमेवा-पीतो भवति, नाहमत्र भोग्यं पश्यामीति ॥ ६१६ ॥ २ ॥ एवमे-वैष मघवन्निति होवाच एतन्त्वेव ते भूयोऽनुव्याख्यास्यामि नो एवान्यत्रैतस्माद्वसापराणि पञ्च वर्षाणीति। स हापराणि पञ्च

वर्षाण्युवास, तान्येकशतꣳ संपेदुरेतत्तद् यदाहुरेकशतꣳ ह वै वर्षाणि मघवान् प्रजापतौ ब्रह्मचर्य्यमुवास, तस्मै होवाच ॥६१७॥३॥

इति एकादशः खण्डः ॥ ११

द्वादशः खण्डः ।

मघवन्मर्त्त्यं वा इदꣳ शरीरमात्तं मृत्युना तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठानम्, आर्त्तो वै सशरीरः प्रियाप्रियाभ्यां, न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्त्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः ॥ ६१८ ॥ १ ॥ अशरीरो वायुरभ्रं विद्युत् स्तनयित्नुरशरीराण्येतानि, तद् यथैतान्यमुष्मादाकाशात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यन्ते ॥ ६१९ ॥ २ ॥ एवमेवैष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरूप सम्पद्य स्वेन रूपेणाभिनिष्पद्यते; स उत्तमपुरुषः । स तत्र पर्य्येति जक्षत् क्रीडन् रममाणः स्त्रीभिर्वा ज्ञातिभिर्वा नोपजनꣳ स्मरन्निदꣳ शरीरꣳ स यथा प्रयोग्य आचरणे युक्त एवमेवायमस्मिञ्छरीरे प्राणो युक्तः ॥ ६२० ॥ ३ ॥ अथ यत्रैतदाकाशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चतुरथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणमथ यो वेदेदमभि व्याहराणीति स आत्माऽभिव्याहाराय वागथ यो वेदेदꣳशृणवानीति स आत्मा श्रवणाय श्रोत्रम् ॥ ६२१ ॥ ४ ॥ अथ यो वेदेदं मन्वानीति स आत्मा मनोऽस्य दैवं चक्षुः, स वा एष एतेन दैवेन चक्षुषा मनसैतान् कामान् पश्यन् रमते, य एते ब्रह्म लोके ॥ ६२२ ॥ ५ ॥ तं वा एतं देवा आत्मानमुपासते,

तस्मात्ते पाꣳ सर्वे च लोका आत्ताः सर्वे च कामाः, स सर्वाꣳश्च लोकानाप्नोति सर्वाꣳश्च कामान्, यस्तमात्मानमनुविद्य जानातीति ह प्रजापतिरुवाच प्रजापतिरुवाच ॥ ६२३ ॥ ६

इति द्वादशः खण्डः ॥ १२ ॥

त्रयोदशः खण्डः ।

श्यामाच्छवलं प्रपद्ये शवलाच्छ्यामं प्रपद्ये अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात् प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामीत्यभिसम्भवामीति ॥ ६२४ ॥ १ ॥

इति त्रयोदशः खण्डः ॥ १३ ॥

चतुर्दशः खण्डः ।

आकाशो वै नाम नामरूपयोर्निवहिता ते तदन्तरा तद् ब्रह्म तदमृतꣳस आत्मा । प्रजापतेः सभां वेश्म प्रपद्ये यशोऽहं भवामि ब्राह्मणानां यशो राज्ञां यशो विशां यशोऽहमनुप्रापत्सि, स हाहं यशसां यशः श्येतमदत्कमदत्कꣳ श्येतं लिन्दु माभिगां लिन्दु माभिगाम् ॥ ६२५ ॥ १ ॥

इति चतुर्दशः खण्डः ॥ १४ ॥

पञ्चदशः खण्डः ।

तद्धैतद् ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्यः, आचार्य्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्म्मातिशेषेणाभि-

समावृत्य कुटुम्बे शुचौ देशे स्वाधायमधीयानो धार्म्मिकान् विदध-दात्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्याहिᳬसन् सर्वभूतान्यन्यत्र तीर्थेभ्यः, स खल्वेवं वर्त्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते, न च पुनरावर्त्तते न च पुनरावर्त्तते ॥ ५२६ ॥ १ ॥

इति पञ्चदशः खण्डः ॥ १५ ॥

अष्टमोऽध्यायः समाप्तः ॥ ८ ॥

इति सामवेदीय छान्दोग्योपनिषत् सम्पूर्णा ।

ॐ तत्सत्